Peer-reviewed Research Journal

ISSN 2277 - 2359

# निबन्धमाला

वार्षिकशोधपत्रिका

प्रधानसम्पादकः

**प्रो. श्रीगोविन्दपाण्डेयः**

परिसरनिदेशकः

सम्पादकः

**प्रो. का. इ. मधुसूदनः**

न्यायविद्याशाखाध्यक्षः

केन्द्रीयसंस्कृतविश्वविद्यालयः

**गुरुवायूर्-परिसरः**

पुरनाट्टुकरा, तृश्शूर्, केरलम् - 680551

चतुर्दशं पुष्पम्

2023 - 24

Peer-reviewed research Journal ISSN: 2277-2359

# निबन्धमाला

परिसरस्य वार्षिकशोधपत्रिका

प्रधानसम्पादकः

**आचार्यः श्रीगोविन्दपाण्डेयः**

**परिसरनिदेशकः**

सम्पादकः

**आचार्यः का. इ. मधुसूदनः**

**न्यायविभागाध्यक्षः**

**केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली**

(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A++ श्रेण्या प्रत्यायितः)

**गुरुवायूर्-परिसरः**

पुरनाट्टुकरा, तृश्शूर्, केरलम् – 680551

चतुर्दशं पुष्पम् वर्षम् - 2023-24

PEER-REVIEWED RESEARCH JOURNAL ISSN: 2277 - 2359

# NIBANDHAMALA

ANNUAL RESEARCH JOURNAL OF THE CAMPUS

CHIEF EDITOR

**PROF. SHRI GOVINDA PANDEY**

CAMPUS DIRECTOR

EDITOR

**PROF. K. E. MADHUSUDANAN**

HEAD, DEPARTMENT OF NYAYA

CENTRAL SANSKRIT UNIVERSITY, NEW DELHI

(ACCREDITED BY NAAC WITH GRADE A++)

GURUVAYOOR CAMPUS

PURANATTUKARA, THRISSUR, KERALA - 680551

14TH EDITION YEAR - 2023-24

**प्रकाशकः**

निदेशकः

केन्द्रीयसंस्कृतविश्वविद्यालयः

गुरुवायूर्-परिसरः, पुरनाट्टुकरा

तृशशूर्, केरलम् - 680551

दूरवाणी – 0487-2308608/208

ई-मेल् - director-thrissur@csu.co.in

जालपुटसङ्केतः - www.csu-guruvayoor.edu.in

मुद्रणाधिकारः - @केन्द्रीयसंस्कृतविश्वविद्यालयः

समीक्षासमित्या परिशीलिता वार्षिकशोधपत्रिका ISSN: 2277-2359

चतुर्दशं पुष्पम् वर्षम् 2023-24

मूल्यम् – 500 रूप्यकाणि प्रतयः 150

पुटविन्यासः – डा. गणेशकृष्णभट्टः

मुद्रणम् – भावना प्रिन्ट् फाक्टरी, तृश्शूर्, केरलम्

**Publisher:**

**Director**

**Central Sanskrit University**

**Guruvayoor Campus, Puranattukara**

**Thrissur, Kerala - 680551**

**Phone:- 0487-2308608/208**

**Email:- director-thrissur@csu.co.in**

**Web:- www.csu-guruvayoor.edu.in**

**Copyright: @Central Sanskrit University**

**Peer-reviewed Research Journal** **ISSN: 2277-2359**

**14th Edition** **Year: 2023-24**

**Price: 500** **Copies: 150**

**Page setting & Design: Dr. Ganesh Krishna Bhat**

**Printed At:– Bhavana Print Factory, Thrissur, Kerala**

# समीक्षासमितिः


## अध्यक्षः

**प्रो. सि. जि. विजयकुमारः**

कुलपतिः, म.पा.सं.वै.वि.वि, उज्जयिनी, मध्यप्रदेशः

## सदस्याः

**प्रो. मधुसूदन पेन्ना**

कुलपतिचरः, क. का. वि. वि, नागपुरम्

**प्रो. पि. महाबलेश्वरभट्टः**

प्राचार्यचरः, रा. सं. सं, राजीवगान्धीपरिसरः, श्रृङ्गेरी

**प्रो. पि. केशवन्**

निदेशकचरः, के. सं. वि, गुरुवायूर्-परिसरः, तृश्शूर्

**प्रो. कृष्णकुमारः**

आचार्यचरः, स. सं. विद्यालयः, तृपुणित्तुरा

**प्रो. एम्. वि. नटेशन्**

आचार्यचरः, श्री. शं. सं. वि. वि, कालटी

**प्रो. एन्. के. सुन्दरेश्वरन्**

आचार्यः, संस्कृतविभागः, कालिकट् वि. वि., कालिकट्

# Peer-Review Committee

**Chairman**

**Prof. C. G. Vijayakumar**

**Vice-chancellor, MPSVV, Ujjain, M. P**

**Members**

**Prof. Madhusudan Penna**

**Ex. Vice-chancellor, KKSU, Nagpur.**

**Prof. P. Mahabaleshwar Bhat**

**Ex. Principal, RSKS R. G. Campus, Sringeri.**

**Prof. K. P. Kesavan**

**Ex. Director, CSU Guruvayoor Campus, Thrissur.**

**Prof. Krishnakumar**

**Retd. Professor, Govt Sanskrit College, Tripunittura.**

**Prof. M. V. Natesan**

**Retd. Professor, SSUS, Kalady.**

**Prof. N. K. Sudareswaran**

**Professor, Dept. of Sanskrit, University of Calicut.**

# सम्पादनसमितिः


## प्रधानसम्पादकः

आचार्यः श्रीगोविन्दपाण्डेयः, निदेशकः

## सम्पादकः

आचार्यः का. इ. मधुसूदनः, न्यायविभागाध्यक्षः

## समितिसदस्याः

प्रो. के. विश्वनाथन्, आचार्यः, साहित्यविभागः

डा. उमेशचन्द्रमिश्रः, सहाचार्यः अध्यक्षश्च, व्याकरणविभागः

डा. के. गिरिधररावः, सहाचार्यः, शिक्षाशास्त्रविभागः

श्रीमती जेस्सी के. ए, सहायकाचार्या, मलयालं विभागः

डा. षीबा. एम्. के, सहायकाचार्या, आङ्ग्लविभागः

डा. रेम्या. पि. आर्, सहायकाचार्या(सं), हिन्दीविभागः

डा. शिबु. ओ. वि, सहायकाचार्यः(अ), अद्वैतवेदान्तविभागः

डा. गणेशकृष्णभट्टः, सहायकाचार्यः(अ), फलिततज्योतिषविभागः

# Editorial Board


## Chief Editor

**Prof. Shri Govinda Pandey, Director**

## Editor

**Prof. K. E. Madhusudanan, HoD, Nyaya**

## Members

**Prof. K. Viswanathan, Professor in Sahitya**

**Dr. Umesh Chandra Mishra, Asso. Professor in Vyakarana**

**Dr. K. Giridhara Rao, Asso. Professor in Education**

**Smt. Jessy K.A, Asst. Professor in Malayalam**

**Dr. Sheeba M.K, Asst. Professor in English**

**Dr. Remya P.R, Asst. Professor(C) in Hindi**

**Dr. Shibu O.V, Asst. Professor(G) in Advaita Vedanta**

**Dr. Ganesh Krishna Bhat, Asst. Professor(G) in P.Jyotisha**

प्रो. श्रीनिवास वरखेड़ी
कुलपति
केन्द्रीय संस्कृत विश्वविद्यालय
संसद के अधिनियम द्वारा स्थापित
(पूर्व में राष्ट्रिय संस्कृत संस्थान,
शिक्षा मन्त्रालय, भारत सरकार के अधीन)

Prof. Shrinivasa Varakhedi
Vice-Chancellor
Central Sanskrit University
Established by an Act of Parliament
(Formerly Rashtriya Sanskrit Sansthan,
Under Ministry of Education, Govt. of India)

के.सं.वि./कुलपति-101/2024-25/ 69

आषाढ शुक्ल चतुर्थी, वि.सं. 2081
दिनांक – 09.07.2024

आज़ादी का अमृत महोत्सव

## कुलपतिसन्देशः

**भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।**
**क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे।।**(मु.उ - ८)

यया मनुष्यस्य हृदयस्थाः सर्वे सन्देहरूपाः ग्रन्थय उद्घाट्यन्ते, यया मनुष्यस्य सर्वे संशयाः नश्यन्ति, सर्वाणि कर्माणि विनश्यन्ति जीवः परमानन्दमधिगच्छति, यत ज्ञानस्य साधनं सा विद्या। विद्यया अध्ययनाधिगमरूपं शास्त्रपरम्परासंरक्षणं सम्भवति। सा च विद्या शोधलेखप्रकाशनेन सुदृढा भवति। व्यावहारिकदृष्ट्या जीवनस्य विभिन्नपक्षाणां सैद्धान्तिकता चिन्तनात्मकता बोधात्मकता अनुप्रयोगात्मकता च शोधपरिणामेन पुष्यन्ते। तत्र छात्राणामध्ययनसरणिं प्रवर्धयितुकामाः आचार्याः यथा अध्यापनेन सहैव परीक्षणविधिमपि समायोजयन्ति। तथैव लेखनपाटवं भाषादक्षताञ्च सम्वर्धयितुं व्युत्पत्तिपक्षदार्शनिकपक्षैतिहासिकपक्षान् च परीक्षितुं निबन्धप्रकाशनमपि प्रकल्पयन्ति तद्विदः। एतस्यामेव समेधमानायां धारायां केरलराज्ये त्रिशिवपुरनगरस्थितकेन्द्रीयसंस्कृतविश्वविद्यालयस्य गुरुवायूर्-परिसरो विद्वद्भी रचितानां निबन्धानां सम्पादनेन **"निबन्धमाला"** नाम्नी पत्रिका प्रतिवर्षमिव प्राकाश्यं नीयते इति ज्ञात्वा मोमुदीति मे मनः।

अकारणकरुणावरुणालयस्य गुरुवायूर्-भगवतः प्रसादेन पत्रिकेयं विदुषां प्रबन्धकसुमानि समाचिन्वती विपश्चितां चेतश्चमत्कृतिं सञ्चारयन्ती परिसरस्य प्रतिभाविशेषं विस्तारयन्ती अगणितगुणिगणमनांसि समाह्लादयन्ती च संराजतामिति मम शुभाशंसा।

(प्रो.श्रीनिवासवरखेडी)
कुलपतिः

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)
भारतसर्वकारस्य शिक्षामन्त्रालयाधीनः
गुरुवायूर् परिसरः
पुरनाट्टुकरा, तृश्शूर्, केरलम् - ६८० ५५१

Central Sanskrit University
Established by an Act of Parliament
(Formerly Rashtriya Sanskrit Sansthan, Deemed University)
Under Ministry of Education
Govt. of India
Guruvayoor Campus
Puranattukara, Thrissur Dist., Kerala - 680 551

Ph : 0487- 2307208 (Office) | 2307608 (Director) | Mob : 9446037208 (Director)
E-mail: director-thrissur@csu.co.in | Website: www.csu-guruvayoor.edu.in
Accredited with A++ Grade by NAAC

D. No.

Date: 26/04/2024

# पुरोवाक्

केन्द्रीयसंस्कृतविश्वविद्यालयस्य द्वादशपरिसरेषु गुरुवायूर्-परिसरोऽयम् अन्यतमः, येन परिसरेण प्रतिवर्षमिव ऐषमोऽपि निबन्धमालाख्या वार्षिकशोधपत्रिका प्रकाश्यत इति मे मन उल्लसितमस्ति। बहुवर्णैः पुष्पैः मणिभिः वा रचिता माला यथा मनोहारिणी हृदयाह्लादिनी च भूत्वा भगवतः शोभां वर्धयति तथैव विभिन्नाभिः भाषाभिः विभिन्नैः विषयैश्च सुशोभितेयं निबन्धमाला विदुषां पाठकानां शिक्षकाणां छात्राणां च कृते उपकारिणी भवति। अत्र प्रकाशिताः लेखाः समीक्षासमित्या अनुमोदिता एव, येन पत्रिकेयं PEER-REVIEWED RESEARCH JOURNAL रूपेण प्रकाश्यते।

शोधपत्रिकायामस्यां येषामप्रतिमलेखकानां लेखाः सङ्कलिताः ते मुख्यतया युवानः सन्ति, य एवास्माकम् उज्ज्वलस्य भविष्यत्कालस्य सूचकाः। लोकेऽस्मिन् युगमिदमध्ययनस्येत्युच्यते, अर्थाद्युगमिदं प्राप्तशिक्षणानां ज्ञानिनां कृतपरिश्रमाणाम् अवतरणस्य युगम्। अतः पत्रिकायामस्यां युवप्रतिभागिनामालेखैः युगस्यास्य आनयनं कृतमिव भासते। प्रकाश्यमानायां पत्रिकायां सर्वविधसौविध्यं युवप्राध्यापकेभ्यः प्रदत्तम्। तस्मादेव युवविदुषां लेखाः अत्यधिकरूपेण अत्र अभिलसन्ति।

Scanned with ACE Scanner

शोधपत्रिकायाम् अध्यात्मतत्त्वेन चतुर्दशविद्यासंवलितलेखानां प्रकाशनम् अवलोकितम्। किञ्च लेखेषु महर्षिकल्पानां वचनानि उदाहृतानि, यानि पाठकानां मनस्सु आनन्दं जनयेयुः, यत्र चापि लेखेषु सामाजिक-राजनैतिक-आर्थिकसम्बन्धः परिलक्ष्यते। अतो ग्रन्थोऽयं संस्कृतानुरागिणाम् उपकाराय कल्पत इत्यत्र नास्ति सन्देहलेशः।

अस्याः निबन्धमालायाः सम्पादकः आचार्यः का. इ. मधुसूदनवर्यः, यस्य दर्शने मीमांसायामन्यशास्त्रेषु चापि सुमहान् परिश्रमः कृतो विद्यते। तस्य सर्वविधोन्नतिकामनया साकं गुरुपवनपुरेशस्य भगवतः श्रीकृष्णस्य चरणकमलयोः भक्तिकुसुमाञ्जलिः समर्प्यते।

श्रीगोविन्दपाण्डेयः

प्रो. श्रीगोविन्दपाण्डेयः

परिसरनिदेशकः

प्रधानसम्पादकः

निबन्धमाला 2023-2024

Scanned with ACE Scanner

# सम्पादकीयम्

समोदमिदं निवेद्यते यत् ऐषमः निबन्धमालानाम्न्याः विद्वत्परिशीलितायाः (Peer-reviewed) वार्षिकशोधपत्रिकायाः चतुर्दशं पुष्पं केन्द्रीयसंस्कृतविश्वविद्यालयस्य गुरुवायूर्-परिसरेण प्राकाश्यं नीयते। पत्रिकैषा भारतीयासु विविधासु ज्ञानशाखासु कृतभूरिपरिश्रमाणां विदुषां शोधकर्मरतानां छात्राणां च स्वाशयविनिमयाय भारतीयवाङ्मयस्य बहुजनसम्बन्धसम्पादनाय च कश्चनावसरो भूयादित्युद्देशेनारम्भि। संस्कृतम्, हिन्दी, आङ्ग्लम् इति तिसृषु भाषासु शोधलेखाः समीक्षापूर्वकं न्यवेक्षिषत। शोधलेखप्रस्तोतॄन् उपविंशान् अभिनन्द्य तेभ्योऽहं धन्यतामाविष्करोमि।

निबन्धमालायां शुभसन्देशं प्रेष्य, मुद्रणोचितद्रविणसाहाय्यम् उपकल्प्य चान्वग्रहीषुः केन्द्रीयसंस्कृतविश्वविद्यालयस्य विततयशसः कुलपतयः आचार्याः श्रीनिवासवरखेडीमहोदयाः। तेभ्यः प्रणामपूर्वकं कार्तज्ञ्यं प्रकटयामि। मुख्यालयस्थितेन प्रकाशनविभागेन मार्गनिर्देशनमकारीति तत्रत्याधिकारिभ्यः कृतज्ञतामावेदयामि। प्रधानसम्पादकरूपेण पदे पदे उपयुक्तोपदेशेन परिसरस्य निदेशकाः आचार्याः श्रीगोविन्दपाण्डेयमहोदयाः उपाकार्षुः। तेभ्यः कृतवेदिता आवेद्यते। प्रचिकाशयिषितानां लेखानां समीक्षणं विधाय युक्तायुक्तत्वनिर्धारणं कृत्वा अस्याः शोधपत्रिकायाः उपादेयतां समवर्धयन् समीक्षासमितेः मान्याः सदस्याः आचार्यविजयकुमारमहोदयप्रमुखाः। अतः तेभ्यः नतिपूर्वकं कृतज्ञतामावेदयामि। सम्पादनकर्मणि सुबहु प्रयस्य ग्रन्थस्यास्य प्रकाशने साह्यमाचरन् सर्वेऽपि सम्पादकमण्डलसदस्याः। टङ्कण-पुटविन्यासादिकर्म चारु निर्वर्तितवते डा.गणेशकृष्णभट्टमहोदयाय तथा अन्येभ्यः समितिसदस्येभ्यः सर्वेभ्यः आधमर्ण्यं प्रकटयामि। तथा भावना-मुद्रणालयाधिकारिभ्यः साधुवादान्वितनोमि।



प्रो. का. इ. मधुसूदनः

सम्पादकः

निबन्धमाला 2023-24

| क्र.सं | विषयः | लेखकः | पृष्ठसंख्या |
|---|---|---|---|


## संस्कृतविभागः


1. गीतायाः वैदिकत्वं वर्तमानसमाजे च तस्याः उपयोगिता
   प्रो. श्रीगोविन्दपाण्डेयः 01
2. नवनीतौ सर्वविद्याधराणां विनिर्माणचिन्तनम्
   डा. गणेश ति. पण्डितः 16
3. न्यायविशिष्टाद्वैतयोः बुद्धितत्त्वसमीक्षा
   प्रो. एन्. आर्. श्रीधरन् 28
4. शब्दशासनमीमांसा
   डा. उमेशचन्द्रमिश्रः 40
5. संस्कारेषु नामकरणसंस्कारस्योपयोगिता
   डा. बि. नरेशकुमारनायकः 56
6. गृहनिर्माणार्थम् आयादिवर्गानयनक्रमः
   डा. गणेशकृष्णभट्टः 65
7. प्राचीनलौकिकसंस्कृतसाहित्ये राष्ट्रियभावना
   डा. सोमनाथसेनापतिः 83
8. साहित्यशास्त्रग्रन्थेषु काव्यभेदविचारविषये विश्लेषणात्मकमध्ययनम्
   आशा. इ 98


## हिन्दीविभागः


9. महाराजभोजकृत शृङ्गारप्रकाश में अलङ्कारविमर्श
   डा. कृपाशंकरशर्मा 109
10. भक्ति की प्रेम दीवानियाँ अक्कमहादेवी और मीराबाई - एक तुलनात्मक अध्ययन
   डा. रेम्या पी. आर 118

# English Section

11. Innovative Ingredients and Strategies of Learning within *PAÑCATANTRA*

Dr. Lakshmi C 133

12. Features, Functions, and Components of an LIS-Traditional Library Classification System For E-Environments

Dr. Anand Rautmale 153

13. Prologue of E-Learning resources MOOCS & SWAYAM

Dr. P. Vidhyadhar 192

14. Holistic Harmony: Ayurveda and Yoga Controlling Lifestyle Disorders

Dr. M. K. Agrawal & Jigayasha Thakur 207

15. Women In Indian Classical Theatre – An Overview

Gayathri. L 225

16. Pentapod Reasoning In Nyaya Philosophy

Irfana Husna. B 241

17. App Development - Frameworks and Technologies

Nisha Vinod 261

18. How Indra Became Devalued Among Other Hindu Deities – An Overview

Athira. S 268

19. A Range of Musical Components in Vāyu Puraṇa

Pallavi Gopan 281

***********

# गीतायाः वैदिकत्वं वर्तमानसमाजे च तस्याः उपयोगिता

**प्रो.श्रीगोविन्दपाण्डेयः**

निदेशकः

केन्द्रीयसंस्कृतविश्वविद्यालयः

गुरुवायूर्-परिसरः, तृश्शूर्

**शोधपत्रसारः**

श्रीमद्भगवद्गीताख्यं शास्त्रं वैदिकवाङ्मये सम्पूर्णवेदस्थानीयमिति शास्त्रविदांमतम्। वेदवत्त्रिकाण्डात्मकत्वात्, समस्तवेदार्थसारसंग्रहभूतत्वात्, सर्वशास्त्र-मयत्वात्, सर्वसाधारणलोकोपकारकत्वाच्च। वेदेषु उपनिषत्सु च भारतीयप्राचीनं ज्ञानं गहनं विविधं विस्तृतञ्च वर्तते, किन्तु तस्यावगमनं सामान्यजनानां कृते दुष्करमेवेति प्रतिभाति। श्रीमद्भगवद्गीतायां तेषामेव उपनिषदां व्याख्या प्रभावशालिविधिना कृता वर्तते। श्रीमद्भगवद्गीतायां निहितं ज्ञानं मानवजीवनस्य प्रत्येकं क्षेत्रे जनान् सन्मार्गदर्शनं विदधाति। विश्वसाहित्ये गीतायाः महत्त्वपूर्णस्थानमस्ति। गीता केवलं कर्त्तव्यच्युतार्जुनं पथप्रदर्शनार्थमेव नास्ति प्रत्युत गीतायाः उद्देश्यं तु समग्रवैदिकसिद्धान्तान् सरलसरससंक्षिप्तरूपेण प्रतिपादनार्थं जनकल्याणार्थं वा वर्त्तते। तथैवाधुनिकसमाजेऽपि गीतायाः महत्वं

वरीवर्ति। तदत्र शोधपत्रेऽस्मिन् गीतायाः वैदिकत्वं वर्तमानसमाजे च तस्याः उपयोगिता इति विषयमुपस्थापितम् वर्तते।

**सङ्केतशब्दाः**

श्रीमद्भवगवद्गीता, वैदिकत्वम्, पूनर्जन्म, यज्ञवर्णनम्, व्यवहारिकज्ञानम्, अचारव्यवहाराः ।

**भूमिका**

श्रीमद्भगवद्गीता सुप्रसिद्धस्य शतसाहस्रीसंहितापरपर्यायस्य विशालकलेवरस्य महाग्रन्थस्य महाभारतस्य सारभूतः। श्रीमद्भगवद्गीता भारतीयसंस्कृतेः प्राणभूता गुणगौरवं चास्ति। इयं गीता सर्वासामपि उपनिषदां सारभागो वर्तते। गीता स्वयं कोऽपि ग्रन्थविशेषः नास्ति, अपि तु महाभारतस्य बीजतत्त्वं वर्तते, यः आधारः तत्त्वज्ञानविषयकवृहद्ग्रन्थानाम्। ज्ञानगरिमान्विता गीता खलु आत्मस्वरूपम् अवबोधयति, स्थितप्रज्ञतां साधयति, निष्कामकर्मयोगं निष्पादयति, ज्ञानयोगम् उद्भावयति, भक्तियोगं च ज्ञापयति। योगेश्वरः श्रीकृष्णः गोस्वरूपाणामुपनिषदां दोग्धा पार्थो गोदहनकाले स्तनन्धयत्वेन समुपस्थितो वत्सः सुधियश्च तस्य गोदोहस्य दुग्धामृतस्य भोक्तारः। उक्तं च-

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।

पार्थो वत्सः सुधीर्भोक्ता, दुग्धं गीतामृतं महत्॥[1]

महाभारतस्य असामान्याः विशेषताः वीक्ष्य इदं पञ्चमवेदरूपेण स्मर्यते। महाभारते एव श्रीमद्भगवद्गीता विष्णुसहस्रनाम, अनुगीता, भीष्मस्तवराजः, गजेन्द्रमोक्षश्चेति श्रीमुखवाणीस्वरूपा पञ्चरत्नानि सन्ति। एषु पञ्चसु श्रीमन्महाभारतस्य सर्वस्वभूता भगवतः श्रीकृष्णस्य श्रीमुखवाणीस्वरूपा श्रीमद्भगवद्गीता संस्कृतसाहित्यस्य एकभास्वरं रत्नं विद्यते।

1. साधारणतः गीतायाम् आत्मनः अमरतायाः विवेचनं स्थितप्रज्ञस्य वर्णनम्, अनासक्तियोगः, लोकसङ्ग्रहकर्तव्यम्, ज्ञाज्ञजनानां भेदः, योगिनां माहात्म्यम्, ज्ञानयोग – कर्मयोग – भक्तियोगानाम् अनुपमसमन्वयः, भक्तलक्षणम्, योगारूढलक्षणम्, निष्कामकर्मयोगस्य प्रतिपादनम्, भगवतः विभूतीनां वर्णनम्, क्षेत्र-क्षेत्रज्ञविवेचनम्, प्रकृतिपुरुषविवेचनम्, गुणविभागः, क्षर – अक्षर - पुरुषोत्तमादीनां स्वरूपम्

[1]गीता महात्म्यम् ।

इत्यादयः विवेच्यविषयाः सन्ति। एते विषयाः अत्र तर्कयुक्तत्वेन मनोवैज्ञानिकरूपेण च अत्र प्रस्फुटीकृताः। दार्शनिकत्वेन मनोवैज्ञानिकरूपेण च अत्र प्रस्फुटीकृताः।

संस्कृतसाहित्येऽमूल्यरत्नसदृशमस्ति श्रीमद्भगवद्गीता। इयं रचना संस्कृतभाषायाः श्रेष्ठा रचना इत्युच्यते बुधैः। महाभारतस्य भीष्मपर्वणि वर्णितासारभूता रचना मन्यते, एषा रचना न केवलं भारतवर्षे अपि तु सम्पूर्णविश्वे एव गीतायाः महत्त्वम् उद्घोषणं भवति। अतो विभिन्नासु भाषासु गीतायाः अनुवादोऽप्युपलभ्यते। वस्तुतो गीतायां श्रीकृष्णार्जुनसंवादमाध्यमेन वेदानाम् उपनिषदानाञ्च ज्ञानस्य सारः समुद्धृतः।

**शोधपत्रस्योद्देश्यानि**

प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते इति वचनं मनसि निधाय अधोऽत्र प्रस्तूयन्ते शोधपत्रस्योद्देश्यानि –

- श्रीमद्भगवद्गीतायां वर्णितायाः शिक्षायाः समीक्षणम् ।
- श्रीमद्भगवद्गीतानुसारंव्यवहारिकज्ञानस्य परिशीलनम् ।
- आधुनिक समाजे गीतायाः महत्वं उपयोगित्वम् च ।

- श्रीमद्भगवद्गीतायां प्रतिपादितस्य ज्ञानस्य वर्तमानसमाजे प्रासङ्गिकता निरुपणम् ।

**अनुसन्धानविधिः**

कस्मिन्नपि अनुसन्धानकर्मणि नूतनतथ्यानामन्वेषणाय अनुसन्धानप्रविधयः अपेक्षिताः सन्ति । अनुसन्धानप्रविधिशास्त्रे अनेके प्रविधयः उक्ताः यथा विश्लेषण- संश्लेषण-समीक्षात्मक-तुलनात्मक-गवेषणात्मक-समालोचनात्मकश्चेति । शोधपत्रेऽस्मिन् समीक्षात्मकप्रविधेः, सर्वेक्षणात्मकप्रविधेः गवेषणात्मकप्रविधेश्च प्रयोगः करिष्यते ।

**गीतायाः वैदिकत्वम्**

विश्वविख्याता गीता वैदिकज्ञानविज्ञानानां आकरग्रन्थो वर्तते। गीतायां वैदिकसिद्धान्तदिग्दर्शनं भवति नवेति विषये निपुणतया निरीक्षणेन वयमवगच्छामो यदस्यां न प्रायेण काचिदपि चर्चा वेदविरुद्धा। स्वामिदयानन्दप्रवराः सत्यार्थप्रकाशे वदन्ति यत्- **'महाभारतात् प्राक् तु सर्वेऽपि नृपाः पौराश्च वेदानुसारमेव व्यवहरन्तिस्म।'**[2]

[2]सत्यार्थप्रकाशः एकादशः समुल्लास ।

स्वामिनां वचनेन परिपुष्यति यत्महाभारतकाले वेदोदितो धर्मः प्रवर्तमानोऽभवत्। तस्मिन्नेव महाभारतकाले गीतोपदेशोऽर्जुनायाभूत्। अननैव सिध्यति यत्गीतायावैदिकत्वम्।

अस्मिन्नेव विषये जगद्गुरुशङ्कराचार्याः इतरे आचार्याश्च वदन्ति यत् "वैदिकधर्मस्य सत्यसनातनसिद्धान्ततत्त्वानि कालक्रमेण यदा जनतामनसो दूरंगतानि तदानीं तानि तत्त्वानि पुनरुज्ज्वलयितुं संसारसम्मुखं संस्थापयितुं च गीताशास्त्रम् अनुशिष्टम्। अनेनाचार्यवचसापि प्रमाणीभवति यद्गीता वैदिकसिद्धान्तमेवानुसरति। साम्प्रतमत्र केषाञ्चन विषयाणां परिचिन्तनं प्रस्तूमः तथा च विचारयामो यद्वेदोक्तं तत्त्वं तदत्रगीतायां वर्तते न वा। सर्वप्रथमं पुनर्जन्मविषयमवचित्य विचारान्प्रौस्तोमि।

**पुनर्जन्म -**

तथा वैदिकपुनर्जन्मसिद्धान्तस्य स्वीकृतिर्वर्तते। यथा ऋग्वेदे उच्यते यत्–

**पुनर्नो असुं पृथिवी ददातु पुनर्द्यर्देवी पुनरन्तरिक्षम् ।**

**पुनर्नःसोमस्तन्वंददातुपुनःपूषपथ्यांयास्वस्तिः ॥**[3]

एवमेव गीतायाः श्लोकैरपि पुनर्जन्मनः पुष्टिर्भवति। यथा–

**इमं विवस्वते योगं प्रोक्तवानहमव्ययम्।**

**विवस्वान्मनवे प्राहमनुरिक्ष्वाकवेऽब्रवीत्।।**[4]

अस्मिन्श्लोके श्रीकृष्णोऽर्जुनाय कथयति यत् इमं योगं तु अहं पूर्वं विवस्वते राजर्षये प्रोक्तवान्। अत्रानेन श्लोकेन श्रीकृष्णः स्वस्यपूर्वजन्मनो विषये वदति। अस्मिन् एव अध्याये वर्णयति यत् –

**"बहूनिमानि व्यतीतानि जन्मानि तवचार्जुन ।"**[5]

अर्थात् हे अर्जुन! मम तव च बहूनि जन्मानि जातानि। अनेन श्लोकेन पुनर्जन्मनोऽवधारणा भृशं परिपुष्यति।

**अजोऽपि सन्व्ययात्मा भूतानामीश्वरोऽपि सन्।**

**प्रकृतिस्वामधिष्ठाय सम्भवाम्यात्ममायया॥**[6]

अस्य मन्त्रस्य समर्पणभाष्यमेवं वर्तते यत् "हे अर्जुन! यद्यपि अहमनादिः अजन्मा, तथापि पञ्चभूतानि मां पुनर्जन्मग्रहणाय न विवशं

---

[3]ऋक् २३/०६/०७

[4]गीता – ४/१

[5]गीता ४/५

[6]गीता ४/६

विधातुं शक्नुवन्ति। अहं तु भूतानां स्वामी परोपकारभावनया योगिजनोपार्जितशक्त्या जन्म गृह्णामि। मदीयमिदं जन्म न भोगार्थम्, किन्तु अन्येषां कृते मोक्षमार्गोपदेशार्थम् अर्थात् अपवर्गार्थम् आत्मानमजमित्युक्त्वा श्रीकृष्णजीवानां पुनर्जन्म मन्यते। गीतायाः अस्मात् श्लोकादपि पुनर्जन्मविषये ज्ञायते –

**वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि**

**तथा शरीराणि विहाय जीर्णानि, अन्यानि संयाति न वा निदेही।**[7]

अर्थात् यथा मानवः पुरातनानि वस्त्राणि उत्तार्य नवानि धारयति तथैव अजीवात्माऽपि पुरातनानि जीर्णानि शीर्णानि शरीराणि विहाय नवानि शरीराणि समाप्नोति। 'गीतास्थ श्लोकाः सम्यक्तया परिपुष्यन्ति वैदिकसिद्धान्तम्। वेदे यथा पुनर्जन्म विषये वर्णनं प्राप्यते तथैव च गीतायामपि अनेन पुनर्जन्म विषये वैदिकत्वमुपपन्नम्।

**गीतायां वैदिकयज्ञवर्णनम् –**

तत्र यज्ञविषये गीतायां वर्ण्यते यत् –

**यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।**

**तदर्थं कर्मकौन्तेय मुक्तसङ्गः समाचर।।**[8]

---

[7]गीता – २/२२

अर्थात् यज्ञादतिरिक्तं सकलमपि कर्म बन्धनहेतुकं वर्तते। अत एव "यज्ञो वै श्रेष्ठतम कर्म" इति शतपथे प्रोक्तम्। यजुर्वेदे "ते यज्ञपतिः माद्वार्षीत्" (१/२) इत्यस्मिन् मन्त्रे यज्ञपरित्यागनिषेधो वर्तते। यजुर्वेदे एव वर्ण्यते यत् 'यज्ञेन यज्ञम् अयजन्त देवाः" (३१/१६ ) अर्थात् समस्ताः प्राणिनो यज्ञेनैव ईश्वरं पूजयन्ति। गीतायामुपदेशो वर्तते यत्-

**देवान् भावयतानेन ते देवा भावयन्तु वः।**

**परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥**[9]

अर्थात् यज्ञेन देवान् सत्करोतु देवाश्च युष्मान् वर्धापयन्तु। एते एव भावाः सामवेदस्य देवान् अभि इयक्षते (६५१) इत्यस्मिन् मन्त्रे वर्णिताः। एवं बहवः श्लोकाः यज्ञविषये गीतायां सन्ति ये यज्ञविषये वैदिकसिद्धान्तमनुसरन्ति। अन्येऽपि नैके वैदिकसिद्धान्ताः गीतायां विराजन्ते ये गीतायाः वैदिकत्वं स्फुटमेव वा बोधयन्ति ।

**व्यवहारिकजीवने श्रीमद्भगवतीतायाः योगदानम् –**

अस्मिन् प्रपञ्चे मानवः सर्वश्रेष्ठजीवः वर्तते भाषया, आचार, व्यवहार, जीवनशैल्या च सः सर्वान् अतिशेते। मानवजीवनं सर्वदा

---

[8]गीता -३/९

[9]गीता – ३/११

संघर्षमयं भवति। मानवाः प्रत्येकस्मिन् क्षणे स्वीयजीवनमूल्यबोधेन जीवनं यापयितुम् असमर्थः भवन्ति। अतः तेषां कृते पुस्तकस्य ज्ञानं तथा विविधोपदेशज्ञानं अपेक्षते। येन माध्यमेन मानवानां व्यवहारिकजीवनं सुखमयं तथा गतिमयं भवन्ति। एतस्मिन् क्षेत्रे संकृतवाङ्मये बहूनि उपदेशग्रन्थानि सन्ति तेषु श्रीमद्भगवद्गीता एवं अन्यतमा श्रीमद्भगवद्गीता शैक्षिकव्यावहारिकसिद्धान्तानामाधारभूमिः। गीतायां प्रचलितशिक्षणविधयः आधुनिकसकलशैक्षिकविधयः अन्तर्भूताः। गीतायां श्रीकृष्णेन अर्जुनः समरविमुखतारूपान् व्यवहारान् समरसमुखतारूपं व्यवहारं प्रति परिवर्तितः। एतदनुसृत्यैव आधुनिकमनोवैज्ञानिकाः "जीवनव्यवहारपरिवर्तनमेव शिक्षा" इति शिक्षायाः लक्षणं कथयन्ति।

मानवानां समुद्धरणार्थं कर्म-ज्ञान- भक्त्यादि विविधविषयाः श्रीमद्भगवद्गीतायां निहिताः। श्रीमद्भगवद्गीतायाः गायनेन पठनेन श्रवणेन उपदेशेन च आत्मसन्तुष्टिः लभ्यते। अत एव श्रीशङ्कराचार्यः श्रीरामानुजाचार्यः श्रीमाधवाचार्यादिमहापुरुषाः श्रीमद्भगवद्गीतायाः व्याख्यानं कृत्वा कृतकृत्याः अभवन्। एवमेव आधुनिकाः

श्रीरमणमहर्षिः, श्रीगुरुमलयालस्वामी, श्रीविवेकानन्दस्वामी, ऋषिअरविन्दः, बालगङ्गाधरतिलकः इत्यादयः श्रीमद्भगवद्गीताम् आश्रित्य स्व स्व जीवनं यापितवन्तः तथापि लोकहिताय उपदिष्टवन्तश्च। श्रीमद्भगवद्गीतायाः अद्यतनकालेऽपि बहवः कर्मयोगिनः ज्ञानयोगिनः भगवद्भक्ताश्च व्याख्यानं कृत्वा गीतोक्तमार्गेषु सर्वे मानवाः जीवनं यापयन्तु इति उपदिशन्ति।

श्रीमद्भगवद्गीतायाः पारायणेन मनश्शान्तिः आत्मानन्दश्च लभन्ते इति बहवः भक्ताः अनुभूय लोकस्थाः मानवाः सर्वे अनुचरन्तु पारायणं कुर्वन्तु इत्युपदिशन्तः सन्ति–

**"गीतेत्युचारसंयुक्ते म्रियमाणो गतिं लभेत्।'**[10]

इदं सर्वं गीतायाः माहात्म्यं ज्ञात्वा श्रुत्वा च तदनुसारिणः भवन्ति। वर्तमानकालेऽपि सर्वासां मानवसमस्यानां मनसि कृत्वैव श्रीमद्भगवद्गीतापूर्वकजीवनयापनार्थं प्रवर्तन्ते। सर्वेषु क्षेत्रेषु मानसिक – भौतिक – सामाजिकसमायोजनादिषु समस्यानां निवारणार्थं प्रतिस्तरे श्रीमद्भगवद्गीतायाः अध्ययनम् अध्यापनम् अनुसरणम्, अनुसन्धानश्च कृत्वा प्रशान्तजीवनयापनं कुर्वन्ति।

---

[10]वराहपुराण गीता महात्म्य ।

**व्यवहारिकज्ञाने ज्येष्ठानां मार्गानुसरणम् -**

**यद्यदाचरति श्रेष्ठस्तत्तदेवेतरोजनः।**

**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।**[11]

समाजे श्रेष्ठ: ज्येष्ठः यद्यदाचरति इतरेऽपि तदेवाचरन्ति। सः यत् प्रमाणमिति स्वीकरोति तदेव प्रमाणमिति सर्वोऽपि लोकः अनुसरति। अत्र मानवजीवनम् आदर्शमयं स्यादिति गीताचार्य: सामाजिकज्ञानं बोधयति केचन मातृदेवो भव, पितृदेवो भव इति उपन्यसन्तः स्व मातापितृ न वृद्धाश्रमं प्रति प्रेषयन्ति केचन एव मस्ति अस्माकं दुःस्थितिः। तस्मात् एतत्सर्वं विदित्वात् गीताचार्यस्य वचनमाकल्य विहितकर्मसु चरन्तः आदर्शमयजीवनाय यतामहे ।

**निष्कर्षः**

आधुनिकसमाजे मानवजीवनस्य याः याः आवश्यकता सन्ति तासां सर्वासाम् अपि आवश्यकतानां पूर्तेः अनन्तरमपि सन्तुष्टिः नास्ति। समाजे मानसिकाशान्तिः, सामाजिकी अशान्तिः, मनोवैज्ञानिकी अशान्तिः, असन्तोषश्च सर्वत्र विद्यते। पुरुषार्थचतुष्टयस्य प्राप्ती यथा धर्मार्थकाममोक्षादीनाम् अनिवार्यरूपेण आवश्यकता विद्यते, तथैव

[11]गीता – ३/२१

वर्तमान – भौतिकसमाजस्य कृते सफलता कथम् आगच्छति यत्र पदे पदे क्लेशाः सन्देहाः, समस्याश्च सन्ति। व्यक्तिरेव समष्टिकारको भवति, येन समाजस्य लक्ष्यप्राप्तिविषये गभीराध्ययनस्य आवश्यकता वर्तते। वर्तमानसामाजिकानां याः विभिन्नाः समस्याः सन्ति समाधानं कथं भवितुम् अर्हति इयं भावना अनुसन्धातुः मनसि आगता। मानवीयसमस्यानां ज्ञानं तन्निवारणोपायाः कथं भविष्यन्ति इति चिन्ता मनसि निधाय अवधिपत्रकर्ता व्यासप्रणीतां श्रीमद्भगवद्गीताम् अधीतवान्। श्रीकृष्णार्जुनसंवादस्य तन्त्रपरिशीलनं कृत्वैव मनसि स्थितानां सर्वासां समस्यानां समाधानं भवितुम् अर्हति। श्रीमद्भगवद्गीतायां मानवीय शैक्षिकसामाजिकमनोवैज्ञानिकसमस्यानां परिचर्चा कृता वर्तते येन परीशीलनेन तथा अवगाहनेन मानवानां व्यवहारिकजीवने सुखंशान्तिः च आगच्छति।

अतः सर्वैः मनुष्यैः गीतायाः उपदेशानां अनुकूलम् आचरणं कुर्वद्भिः स्वजीवनं धन्यं समुन्नतं च कर्तव्यम्। गीतामृतं सदापेयम् अत एव चोक्तम् "गीता सुगीता कर्तव्या।" एतत् सर्वविदितं गीतायाः प्रतिदिनं स्वाध्यायं कृत्वा सर्वे जनाः स्वकर्तव्यं प्रति सोत्साहिनः, विपत्तौ धैर्ययुक्ताः निरन्तरं विवेकयुक्ताः च भवन्ति। अन्ते अस्य गीताशास्त्रस्य

अध्ययने ब्राह्मणस्य, क्षत्रियस्य, वैश्यस्य, शूद्रस्य, बालकस्य, युवकस्य, वृद्धस्य, स्त्रियाः, पुण्यात्मनः पापात्मनः सर्वेषां च मानवानाम् अधिकारः वर्तते। परन्तु श्रद्धया, भक्त्या प्रेम्णा च सह एव अन्यथा अनया परमगतिलाभः परमकल्याणप्राप्तिलाभः परमकल्याणप्राप्लिभः न भविष्यति एवमेव अयं ग्रन्थः केवलं विरक्तानां सन्तानाम् संन्यासिनां च कृते एव नास्ति अपि तु गृहस्थानां बालकानां चापि पाठ्यग्रन्थः विद्यते।

**भारतामृतसर्वस्वं विष्णोवक्त्राद्विनिःसृतम्।**

**गीतागङ्गोदकं पीत्वा पुनर्जन्म न विद्यते॥**[12]

**सन्दर्भग्रन्थनां सूची –**


1. भगवद्गीता- गीताप्रेस गोरखपुर, २०१८
2. महाभारत- गीताप्रेस गोरखपुर,२०१८
3. वराहपुराण- गीताप्रेस गोरखपुर,२०१८
4. सत्यार्थप्रकाश- महर्षिदयानन्दसरस्वती, अजमेर ग्रन्थालय, १८८२
5. पावमानी पत्रिका – गुरुकुलप्रभात आश्रम मेरठ


[12]भगवद्गीता महात्म्य ।

अन्तर्जालीयस्त्रोतांसि –


- https://www.scotbuzz.org/2018/04/shrimad-bhagavad-gita-ka-mahatva.html
- http://www.igntu.ac.in/eContent/BSc-Yoga-4Sem-DrSandeep-Basis%20of%20Yoga%20Therapy.pdf
- https://sa.wikipedia.org/wiki/%E0%A4%AD%E0%A4%97%E0%A4%B5%E0%A4%A6%E0%A5%8D%E0%A4%97%E0%A5%80%E0%A4%A4%E0%A4%BE

# नवनीतौ सर्वविद्याधराणां विनिर्माणचिन्तनम्

**डा. गणेश ति. पण्डितः**
सहाचार्यः संयुक्त-निदेशकश्च (शैक्षिकपरियोजना),
प्रकाशनानुभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

**पीठिका -**

अथ नवागताराष्ट्रियशिक्षानीतिः देशस्य अधिकाधिकेषु स्थानेषु प्रसरन्ती सती न केवलं देशीयानाम् अपि तु विदेशीयानामपि ध्यानमाकर्षतितमाम्। अस्याः नीतेः वैशिष्ट्यं विनाविवादं वैदेशिकाः अपि अभ्युपगच्छन्तः सन्ति। भारतीयानां सर्वविद्यानां सङ्क्रान्तौ सम्प्रसारणे च इयं नीतिः पूर्णशः सफला भविष्यति इति निश्चप्रचम्। अत एव सर्वैरपि भारतीयशिक्षाविद्भिः सादरमस्याः पूर्णशः क्रियान्वयनाय संस्तुतयः विहिताः। अस्याः नीतेः क्रियान्वयनेन **भारतीयशिक्षाव्यवस्था पूर्णशः देशजाभविष्यति** इत्यत एव अस्याः क्रियान्वयनाय अहमहमिकता परिदृश्यते। विशिष्य भारतीयज्ञानपरम्पराश्रितं सङ्कलितं समष्टिगतं च चिन्तनमेव अस्याः प्रादुर्भावे हेतुरिति मन्यामहे।

सङ्कलितचिन्तनस्य प्रभावेण समुद्भूतायाम् अस्यां नवनीतौ सर्वविद्याधराणां विनिर्माणचिन्तनम् अधिकृत्य विस्तरेण उल्लिखितं वर्तते। सर्वविद्यासमन्वितायाः शिक्षायाः अनुसन्धानकार्यस्य च सम्प्रसारणाय एवमेरुः (MERU - Multidisciplinary Education and Research University) इत्यस्य परिकल्पना अत्र विहिता वर्तते। सर्वप्रकारकविद्याधारितमध्ययनम् अनुसन्धानं च भारतीयविश्वविद्यालयस्थैः युवकैः युवतीभिश्च करणीयम् इत्यनया बुद्ध्या एव नीतिनिर्माणकोविदैः मेरोः कल्पना उच्चशिक्षायां कृता वर्तते। अतः एव अस्मिन् शोधलेखे **सर्वविद्याधराणां विनिर्माणचिन्तनम्** अधिकृत्य मेरुपर्वतोपमायाः (नीतिनिर्माणचतुराणां) विचारधारायाः वैशिष्ट्यं चाधिकृत्य सविस्तरं निरूप्यते।

**कुञ्चिकापदानि** - शिक्षा, आधारभूतस्तरः, सिद्धतास्तरः, मध्यमस्तरः, उच्चस्तरः, गुणवत्ता, समानता, सुलभा , समर्था, समग्रता, प्रविधिः, शिक्षाप्रणाली, शैक्षिकसंरचना

अथ भारतीयाः युवानः गुणवत्तापूर्णां समर्थां च शिक्षां समानरूपेण सुलभतया च सम्प्राप्य वैश्विकमञ्चे राजेरन् इत्युद्देशेन

 ISSN: 2277-2359

नवनीतिः (NEP 2020) समानीता इति तु विदितमेव समेषाम्। नीतिरियं पूर्वतनीं शिक्षाप्रणालीं नैव समर्थयति इत्येतदपि सत्यमेव। तत्र कारणं नाम प्राक्तनशिक्षाप्रणाली (10+2+3) एकमुखाव्यापकलक्ष्यविहीनासिद्धान्तकेन्द्रिता चास्ति। नवीना प्रणाली तु नवशैक्षिकसंरचनामेव (5+3+3+4) समर्थयति। किञ्च उच्चशिक्षायाम् अर्थात् स्नातकोत्तरस्तरे अनुसन्धानकार्याणां सम्पादनाय प्रचोदयति। पूर्वतनशिक्षाप्रणाल्यां कलाविज्ञानवाणिज्यगणकविषयाणां पार्थक्येन अध्ययनाय अवसराः आसन्। अद्यावधि एकमुखशिक्षा अथवा निर्दिष्टविषयैककेन्द्रिता शिक्षा प्रचलिता आसीत्। अधुना तु अन्तःशास्त्रीयम् अध्ययनं कर्तुं विविधविद्यानां ग्रहणार्थं च विपुलावसराः सन्ति। एकविद्याधारिणाम्/ एकमुखविद्याधारिणाम् अपेक्षया सर्वविद्याधारिणः/बहुमुखविद्याधारिणः एव आधिक्येन सफलाः भविष्यन्ति इति नीतिनिर्धारकाणाम् अपि अभिमतं वर्तते। **सर्वविद्याधराणां सर्जनाय सर्वविद्याविशेषैर्युक्तस्य पाठ्यक्रमप्रारूपस्य परिकल्पना** तत्रैव कृता। तदाश्रित्य भारतीयशिक्षाकेन्द्रैः अधुना नवशिक्षानीत्याधारितशिक्षाप्रणालीप्रयुक्ता अस्ति। 2040 संवत्सरतः पूर्वं भारतस्य सर्वाण्यपि उच्चशिक्षाकेन्द्राणि बहुविषयकाध्ययनकेन्द्रत्वेन

परिवर्धितानि भवेयुः येन सर्वप्रकारकविद्याध्ययनस्य वैश्विकं केन्द्रं भारतं भविष्यति इति नीतिनिर्माणकोविदानाम् अभिमतम्। अतः नीतौ उल्लिखिताः एतेन सम्बद्धाः विचाराः अत्र उदाह्रियन्ते। क्रमशः यथा -

1. **सांस्थानिकपुनारचनासमाहारश्च**

विविधविद्याध्ययनकेन्द्रत्वेन भारतीयानां शैक्षिकसंस्थानानां पुनारचना 2040 तमात् संवत्सरात् प्राक्कर्तुं नवनीतौ संसूचितमस्ति। एकैकस्मिन् मण्डले अपि एकैकम् उच्चशिक्षाकेन्द्रम्/विश्वविद्यालयः भवेत् यत्र हि त्रिसहस्रं युवानः शोधकार्याणि कर्तुम् उच्चशिक्षाम् अवाप्तुं च शक्येरन् इति चिन्तनं श्लाघ्यमेव। अनेन विविधेषु अन्तःशास्त्रीयेषु अवान्तरविषयेषु अध्ययनाय अनुसन्धानाय च अवसराः एकस्मिन्नेव स्थाने लभ्यते इत्यतः ज्ञानार्जने ज्ञानवृद्धौ ज्ञानसम्प्रेषणे च सुस्थिरा वेदिका लभ्यते। ज्ञानानां समाहारोऽपि संभवत्येव।

2. **समग्रशिक्षानुगामिता**

सामाजिकभौतिकबौद्धिकसांवेगिकनैतिकपक्षाणां विकासाय पूरकशिक्षाव्यवस्था सर्वत्र भवेत्। सर्वविधपक्षाणां विकासकेन्द्रिता शिक्षा यदि दीयते तर्हि तत्र समग्रशिक्षानुगामिताम् अवलोकयितुं शक्नुमः। नीतौ Pedagogy must evolve to make education

more experiential, holistic, integrated, inquiry-driven, discovery-oriented, learner-centred, discussion-based, flexible, and, of course, enjoyable[13] प्रयुक्तानि एतानि पदानि भव्यभारतस्य भविष्योन्मुखशिक्षायाः सर्वतोमुखत्वं सर्वव्यापकत्वं च सङ्केतयन्ति। सर्वसमर्थानां सर्वविद्यासमन्वितानां भारतीययूनां निर्माणय एतादृशी शिक्षा अनिवार्या एव।

### 3. सुगमाधिगमानुकूलपर्यावरणं छात्रोपकारिता च

सुगमाधिगमानुकूलपर्यावरणस्य परिकल्पनं शिक्षकेण कर्तव्यम्। अनेन छात्राः स्वयमेव अधिगन्तुं समर्थाः भविष्यन्ति। उच्चाशिक्षाकेन्द्रे युवानः एव अध्येतारः अनुसन्धातारः नयनपथमवतरन्ति न तु बालाः न वा वृद्धाः। अतस्तेषाम् उपकारी शिक्षकः भवेत् एव । सुगमाधिगमानुकूलपर्यावरणे शैक्षिकसाफल्यं सुनिश्चितम् भवति।

### 4. अभिप्रेरितोत्सुकसुयोग्यशिक्षकाः

उच्चाशिक्षाकेन्द्रेषु गुणवत्तापूर्णशिक्षायाः प्रदानाय अभिप्रेरितोत्सुकसुयोग्यशिक्षकाः सुतराम् अपेक्ष्यन्ते। यदि एकैकोऽपि शिक्षकः सन्तुष्टः तर्हि तदीयानि शैक्षिककार्याणि अपि निर्विघ्नतया

[13] National Education Policy 2020

उपजायन्ते। शिक्षणे अनुसन्धाने सेवायां च विकाससम्पादनाय अधिकाधिकशिक्षकाणां नियोजनमात्रेण अथवा तेभ्यः सेवाकालिकप्रशिक्षणप्रदानेन नाधिकं साफल्यम् अद्यावधि उपलब्धमस्ति। शिक्षणवृत्तिं चितवताम् आत्माभिप्रेरणा एव अस्मिन् प्रसङ्गे प्रामुख्यं भजते इति मे मतिः। आत्माभिप्रेरितास्तु सोत्साहिनः समर्थाश्च जायन्ते एव। **सोत्साहानां नास्त्यसाध्यं नराणां मार्गारब्धाः सर्वयत्नाः फलन्ति**[14] इति श्लोकवाक्यं प्रसङ्गेऽस्मिन् प्रामुख्यं भजते। स्वीयं छात्रं स्वीयां संस्थां वृत्तिं च आत्माभिप्रेरितः एव भृशं प्रीणाति।

## 5. शिक्षकशिक्षा

एकीकृतशिक्षकशिक्षाकार्यक्रमस्य अध्येता एव कालान्तरे शिक्षकपदाय योग्यः व्यक्तिविशेषः भविष्यति इत्यतः एकवर्षीयस्य अथवा द्विवर्षीयस्य पाठ्यक्रमस्य अपेक्षया चतुर्वर्षीयः एकीकृतशिक्षकशिक्षाकार्यक्रमः उत्तमः इति नीतौ निगदितम्। शिक्षकशिक्षायाः नवसंरचनया भारतस्य शिक्षकशिक्षाक्षेत्रे क्रान्तिपूर्णानि परिवर्तनानि जायमानानि सन्ति। शिक्षकनिर्माणकर्मणि शिक्षकशिक्षासेतुरिव कार्यं करोति इत्यपि नीतौ उल्लिखितमस्ति।

[14] सूक्तिसौरभम् 3-08

शिक्षकः भारतस्य भविष्यनिर्माता अपि अस्ति इत्यतः शिक्षकशिक्षायाः विषये विशेषादरः नीतौ दर्शितः वर्तते।

## 6. व्यावसायिकशिक्षायाः पुनः परिकल्पना

व्यावसायिकशिक्षायाः व्यवस्था सामन्यशिक्षया सह सहजरूपेणएव सर्वत्र स्यात् येन व्यावसायिककौशलानि अर्जयितुं बालाः सुखेन शक्नुवन्ति इति षोडशे अध्याये उल्लिखितम् अस्ति। प्राचीनभारते लोकविद्यायाः अपि महत्वम् आसीत् इत्यतः व्यावसायिकशिक्षायाः पुनः परिकल्पनार्थं तत्र सूचनाः प्रदत्ताः सन्ति। मुख्यधारायां व्यावसायिकशिक्षायाः समन्वितः सञ्चारः भवेत्। एतदर्थं NCIVE - National Committee for the Integration of Vocational Education इत्यस्याः विनिर्माणाय शिक्षामन्त्रालयः संसूचितोऽपि। स्वाभीष्टव्यावसायिकशिक्षाम् अवाप्य स्वाभीष्टव्यवसायं चेतुम् अपेक्षितानि कौशलानि शिक्षाकेन्द्रैः एव प्राप्तुं शक्यन्ते इत्यतः एषा संसूचना प्रदत्ता। Vocational Education and Training - VET इत्येषा व्यवस्था सर्वत्र पाठ्यक्रमे भविष्यति चेत्तर्हि कोटिशः कुशलाः सिद्धाः भविष्यन्ति इति विचारः स्तुत्यर्ह एव।

 ISSN: 2277-2359

## 7. वृत्तिपरशिक्षा

कृषिविश्वविद्यालयाः विधिशास्त्रीयविश्वविद्यालयाः, प्रविधिकेन्द्रितविश्वविद्यालयाः, स्वास्थ्यविज्ञानविश्वविद्यालयाः इत्यादयः विश्वविद्यालयाः वृत्तिपरशिक्षां यच्छन्ति। 2030तः पूर्वम् एते विविधविद्याध्ययनविश्वविद्यालयरूपेण परिवर्तिताः भवेयुः इति नीतौ निगद्यते। सामान्यवृत्तिपरयोः शिक्षयोः निमित्तं पार्थक्येन व्यवस्थाद्दष्ट्या एकीकृतशिक्षाव्यवस्था सर्वत्र स्यात् इति चिन्तनं श्लाघ्यमेव।

## 8. गुणवत्तापूर्णशोधस्य संवर्धनम्

नीतिः विश्वविद्यालयेषु शोधसंस्कृतेः समानयनाय संस्तौति। राष्ट्रियशोधप्रतिष्ठानम् (NRF) इत्यस्य प्रस्तावोऽपि तत्र विहितः वर्तते। उच्चशिक्षाकेन्द्रेषु अनुसन्धानकार्यसम्पादनाय अपेक्षितायाः वेदिकायाः विनिर्माणाय पुनश्च यूनाम् अनुसन्धानार्थं नवाचारार्थम् अभिप्रेरणाय च विशेषतया यत्नः कर्तव्य इति उल्लिखितम् अस्ति। शोधवृत्तिदानाय आर्थिकसहयोगप्रदानाय नीतिनिर्धारणाय च पार्थक्येन सर्वेषु विश्वविद्यालयेषु व्यवस्था कर्तव्या इति नीतौ अभिप्रेतम्।

 ISSN: 2277-2359

### 9. प्रभाविप्रशासनं नेतृत्वं च

शिक्षायाः वैश्विकस्तरानुरूपः स्तरः भारतीयशिक्षायाः अपि भवेत्। वैश्विकगुणवत्तापूर्णशिक्षायाः सङ्घटनाय प्रबन्धाय च प्रभाविप्रशासनं नेतृत्वं चापेक्ष्यते इति मत्वैव शिक्षानीतौ एतत्सर्वम् उल्लिखितं वर्तते। प्रशासकाः योग्यताधारिताः भवेयुः। स्वतन्त्रप्रशासनव्यवस्थायुक्तसंस्थारूपेण(independent self-governing institutions) यदि भारतीयाः उच्चशिक्षासंस्थाः परिवर्तिताः भविष्यन्ति चेत्तर्हि शिक्षायाम् अनुसन्धाने सेवासौकर्येषु महत् परिवर्तनं शक्यते।

### 10.नियतप्रणाल्याःस्थानान्तरम्

नियतयाः/ निबन्धनप्रणाल्याः स्थाने मुक्तप्रणाल्यः उच्चशिक्षाकेन्द्राणां सञ्चालनाय स्युः। भारतीयोच्चशिक्षायोगस्य अधीने निबन्धन-मान्यता-वित्तीयसहयोग-शैक्षिकस्वातन्त्र्यविषयकाः विभागाः स्युः। एकत्रैव अमीषां निक्षेपणेन उच्चशिक्षाकेन्द्रेषु कार्यकरणप्रसङ्गे नैकविधाः बाधाः उत्पद्यन्ते इति कृत्वा नियतप्रणाल्याः स्थानान्तराय अथवा प्राक्तनव्यवस्थायाः परिष्काराय संस्तुतयः विहिताः सन्ति।

## 11. भारतीयभाषाकलासंस्कृतीनां संवर्धनम्

भारतदेशः सनातनसंस्कृतेः बृहद्भाण्डागारोपमः वर्तते। कलासाहित्यभाषासभ्यतादीनि तत्त्वानि भारते अद्यापि विलसन्ति। न केवलं भारतीयाः अपि तु कोटिशः वैदेशिकाः सानन्दं भारतीयसंस्कृतिं स्तुवन्ति। मुहुर्मुहुः अत्रत्याः कलाः भाषाः च आस्वादयन्ति। **अतुल्यभारतस्य निर्माणे** मूलभूतानि तथ्यानि इतः एव लभ्यन्ते। अतः भारतीयभाषाकलासंस्कृतीनां संवर्धनदृष्ट्या अध्ययनानुसन्धानसेवासौविध्यानि उच्चशिक्षायाः माध्यमेन भवितुमर्हन्ति इति नीतौ निगदितम्।

## 12. प्रविधेः अनुप्रयोगः समन्वयश्च

प्रविधिमयमिदं जगत्सर्वम्। अधुना उच्चशिक्षायाम् अनुदेशनात्मकप्रविधेः समधिकं महत्त्वं दत्तं वर्तते। भाषाशिक्षणावसरे अनुभूयमानानां समस्यानां वारणाय प्राविधिकप्रयोगशालानां संस्थापनाय च संसूचनाः दत्ताः सन्ति। यथा कक्ष्याशिक्षण-प्राविधिकोपकरणयोः मध्ये समन्वयः स्यात् तथा शिक्षणकार्याणि

जायेरन्। एवं राष्ट्रियशिक्षानीतौ सर्वविद्याधराणां विनिर्माणाय नैके उपायाः उपपादिताः सन्ति।

**उपसंहारः**

राष्ट्रियशिक्षानीतौ उल्लिखिताः सर्वा अपि संसूचनाः भारतीयविद्यानां भाषाणां तथैव कलासंस्कृतीनां च सम्पोषणे संवर्धने सम्प्रसारणे च पूर्णशः योग्याः सन्ति। विशिष्य सर्वविद्याधराणां विनिर्माणाय एतादृश्याः नीतेः महती आवश्यकता आसीत्। 2020 तमे संवत्सरे समागतायाः अस्याः नीतेः क्रियान्वयनं संस्कृतशिक्षाक्षेत्रेऽपि विहितम् अस्ति। **सर्वविद्याधरो यस्तु सर्वविद्याधरेष्वपि**[15] इति पौराणिकं वचः। वस्तुतः संस्कृतज्ञः एव नवनीतेः (NEP- 2020) अनुगुणं सर्वशास्त्रसमन्वितः सन् सर्वविद्याधरपदवीम् अधिरोढुं प्रभवति इति मेमतिः। संस्कृतवाङ्मये तावन्ति वैशिष्ट्यानि ज्ञानविज्ञानसम्बद्धानि सन्ति यावन्ति भारतीयज्ञानप्रणाल्याः (IKS) प्रचारकैः तत्र तत्र उदाह्रियन्ते। एतैः ज्ञानविज्ञानैः संस्कृतज्ञाः अपि लाभान्विताः भवेयुरित्यलं विस्तरेण।

---

[15] स्कन्दपुराणम् ख-4, अ.043, श्लो.17

## सम्बद्धस्रोतांसि


- राष्ट्रीय शिक्षा नीति-2020, मानव संसाधन विकास मन्त्रालय (शिक्षा मन्त्रालय), भारत सरकार
- NEP-2020 – A Revolution in Indian Higher Education System - www.dailyexcelsior.com
- Holistic Education through Integration of skilling, Industry Connect and Employability, Thematic session, Ministry of Education, GOI
- Optimal Learning Environments and Support for Students - nep2020.hinsoli.com
- Senapati, Kalyan. (2018). HIGHER EDUCATION: A WAY TO ACHIEVE QUALITY EDUCATION. 5. 4.
- National Professional Standards for Teachers (Draft), National Council for Teacher Education
- Theme 7: Promotion of Indian Languages and Indian Knowledge Systems, 08.07.22 - https://youtu.be/CTBqJyqvjnU?si=XCruBmM6ehi1EKMQ

 ISSN: 2277-2359

# न्यायविशिष्टाद्वैतयोः बुद्धितत्त्वसमीक्षा

**प्रो. एन्. आर्. श्रीधरन्**

आचार्यः, न्यायविभागः

केन्द्रीयसंस्कृतविश्वविद्यालयः

गुरुवायूर् परिसरः

पुरनाट्टुकरा, तृश्शूर्, केरलम् - 680 551

दूरभाषा – 9895633200,9495331830

विशिष्टाद्वैतवेदान्तिमते आत्माज्ञानस्वरूपः। सः स्वयंप्रकाशः[16] धर्मिभूतज्ञानम् इति च व्यवाहरः। नैयायिकादिभिरङ्गीकृतं ज्ञानं (गुणरूपं) विशिष्टाद्वैतमते स्वयंप्रकाशस्य आत्मनः धर्मिभूतस्य ज्ञानस्य धर्मभूतं भवति। अतः धर्मभूतज्ञानमित्येव संप्रदायः अस्ति। अपि च इदं धर्मभूतज्ञानं विशिष्टाद्वैते द्रव्यगुणात्मकं विभु स्वयंप्रकाशं च। विशिष्टाद्वैतमते नैयायिकमते च आत्मा जीवात्मा परमात्माचेति द्विविधः। तत्र मतद्वयेऽपि परमात्मा एक एव। तस्य ज्ञानं नित्यम्। विशिष्टाद्वैते परमात्मनः ज्ञानं विभु अर्थात् सर्वव्यापि इत्यङ्गीक्रियते। (तदानीमेव सर्वज्ञत्वं संपद्यते इत्यभिप्रायः) जीवात्मा मतद्वयेऽपि प्रतिशरीरं भिन्नः अर्थात् नानाविधः। नैयायिकमते तु जीवस्य ज्ञानम् अनित्यम्।

---

16 न्यायसिद्धाञ्जनम् - जीवसरः

विशिष्टाद्वैते जीवः त्रिविधः बद्धः मुक्तः नित्यश्चेति। तत्र बद्धो नाम संसारेण (जन्ममरणाभ्यां) बद्धः अर्थात् संसारसागरे निमग्नः। तस्य ज्ञानं तिरोहितमेव अर्थात् बद्धावस्थायां ज्ञानं सङ्कुचितं वर्तते। मुक्तो नाम संसारान्मुक्तः अर्थात् मोक्षं (श्रीवैकुण्ठं) प्राप्तः। नित्यो नाम सर्वदा भगवतो नारायणस्य परिचारकाः अनन्त (आदिशेष) गरुड – विष्वक्सेनादयः। मुक्तनित्ययोः जीवयोः ज्ञानं नित्यं विभु च। (विभुत्वंपूर्वोक्तरीत्या)। विशिष्टाद्वैते (धर्मभूत) ज्ञानस्य लक्षणन्तुसकर्मकावभासत्वम्[17] इति। अर्थात् स्वभिन्ननिष्ठविषयतानिरूपकत्वे सति ज्ञानत्वमिति। धर्मिभूतज्ञाने आत्मनि अतिव्याप्तिवारणाय निरूपकान्तं दलम्। अर्थात् ज्ञानत्वमात्रं यदि ज्ञानस्य लक्षणं स्यात् तदा आत्मनि अपि ज्ञानत्वस्य सत्वात् अतिव्याप्तिः। अतः निरूपकान्तम्। तथा च विषयतानिरूपकत्वम् आत्मनि नास्तीति नातिव्याप्तिः। निरूपकान्तमात्रस्य ज्ञानलक्षणत्वे शक्तौ अतिव्याप्तिः। शक्तेरपि सविषयकत्वात्,ज्ञानत्वस्यापि लक्षणघटकत्वे नातिव्याप्तिः ज्ञानत्वस्य शक्तौ अभावात्। विषयतानिरूपकत्वे सति ज्ञानत्वस्य धर्मभूतज्ञानलक्षणत्वे धर्मिभूतज्ञाने (आत्मनि) अतिव्यातिः।

---

[17] न्यायसिद्धाञ्जनम् - बुद्धिसरः

 ISSN: 2277-2359

अतः स्वभिन्ननिष्ठेति दलम्। आत्मनः स्वनिष्ठविषयतानिरूपकत्वसत्वेपि स्व (आत्म) भिन्न (घटादि) निष्ठविषयतानिरूपकत्वाभावात् नातिव्याप्तिः। प्रत्यक्त्वादीनां धर्मिभास्यत्वाङ्गीकर्तृपक्षे प्रत्यक्त्वादौ स्वभिन्ननिष्ठविषयतानिरूपकत्वे सति ज्ञानत्वस्य सत्वात् अतिव्याप्तिः। अतः स्वापृथक् सिद्धधर्मभिन्नत्वमिति दलंज्ञानलक्षणे निवेश्यम्। तथा च नातिव्याप्तिः। एवं सकर्तृकावभासत्वं ज्ञानलक्षणम्। आश्रयतानिरूपकज्ञानत्वमित्यर्थः। जात्यादीनां कर्तृ प्रत्ययेन आश्रयताया एव प्रतीत्या, ज्ञाधात्वर्थं प्रति तस्या एव कर्तृत्वरूपत्वात्। अत्र धर्मि (आत्म) वारणाय सकर्तृकेति। सकर्तृकत्वमात्रस्य ज्ञानलक्षणत्वे पाकादेः अपि चैत्रादि रूपसकर्तृकत्वात्, पाकादौ अतिव्याप्तिः। अतो ज्ञानत्वनिवेशः।

ननु ईश्वरनिष्ठाश्रयतानिरूपकत्वं जीवात्मनि (धर्मिणि) वर्तते इति धर्मिभूतज्ञाने आश्रयतानिरूपकज्ञानत्वम् अस्तीति जीवात्मनि धर्मिभूतज्ञाने अतिव्याप्तिः ईश्वरस्यसर्वाधारत्वात्। न चात्रआश्रयतापदेन ईश्वरावृत्याश्रयता विवक्षिता अतः धर्मिणिईश्वरनिष्ठाश्रयतैव अस्तीति नातिव्याप्तिः इति वाच्यम्। तदा ईश्वरीय (धर्मभूत) ज्ञाने अव्याप्तिः इति चेत् – न - ईश्वरीयधर्मभूतज्ञाननिष्टा या आधेयताव्यक्तिः तद्

व्यक्तिभिन्ना या ईश्वरनिरूपिताऽऽधेयता तदतिरिक्ताऽऽधेयतावत्वस्यैव आश्रयतापदेन विवक्षिततया ईश्वरीयधर्मभूतज्ञाने नाव्याप्तिः। तथा हि – तादृशाधेयता च तत्तद्धर्मभूतज्ञाननिष्ठा जीवनिरूपिता ईश्वरनिरूपिता च आधेयतैव। न तु जीवनिष्ठा ईश्वरनिरूपिता सा आधेयता। अतः ईश्वरीयधर्मभूतज्ञाने नाव्याप्तिः। अत्र आधेयता अपृथक्सिद्धिसंबन्धावच्छिन्नाग्राह्या।अन्यथा काले कालविशेषणतया धर्मिणः (आत्मनः) वृत्तावपि न क्षतिः। अत्यन्तवेगिता इत्यपि ज्ञानस्य लक्षणम्। अपकर्षानाश्रयवेगवत्वमित्यर्थः। ज्ञानात् अतिशयितवेगवद्वस्तु किमपि नास्ति। ज्ञानेतरगताः सर्वेऽपि वेगा ज्ञानवेगादपकृष्टा एव। अत एव हि (बद्ध) जीवस्य मुक्तिकाले धीसङ्कोचककर्मापगममात्रेण तत्क्षणादेव सकलब्रह्याण्डवर्तिद्रव्यसंयोगो जायते। ततश्च अपकर्षानाश्रयवेगवत्वं ज्ञाने एवेति लक्षणसमन्वयः। अत्यन्तसौक्ष्म्यम् इत्यपि लक्षणम्। सौक्ष्म्यम् – प्रतिघातानर्हत्वम्, प्रतिघातविरोधिशक्तिमत्वमिति यावत्। अपकर्षानाश्रयतादृशशक्तिमत्वं लक्षणम्। ज्ञान एव हि प्रतिघातविरोधिशक्तिः सर्वोत्कृष्टा वर्तते। यद्वशात् मुक्तौ सर्वव्यापनशीलायाः बुद्धेः संसारदशायाम् अत्यन्तसङ्कुचितत्वेपि न बुद्ध्यवयवानां परस्परप्रतिघातः।

 ISSN: 2277-2359

1. ननु बुद्धेः नित्यत्वे किं प्रमाणम् इति चेत्-उच्यते-''न विज्ञातुः विज्ञातेः विपरिलोपो विद्यते, न हि द्रष्टुः दृष्टेः विपरिलोपोविद्यते, अविनाशित्वात्'' इत्याद्यागमः प्रमाणम्।
2. तत्र बुद्धेः नित्यत्वे कथं जागरसुषुप्त्यादिभेदसिद्धिः अर्थात् सुषुप्त्यादिषु ज्ञानस्यानुपलब्धेः न यावदात्मभावित्वरूपं नित्यत्वं बुद्धेः इति चेत् – उच्यते –प्रतिबन्धकः तमोगुणः। यथा दाहकस्य वह्नेः चन्द्रकान्तमण्यादिसन्निधौ अदाहकत्वम् मण्यपगमे च हेत्वन्तरनिरपेक्षदाहकत्वम् तथा तमोगुणविशेषसन्निधानासन्निधानाभ्यां स्वापादिसिद्धिः। अपि च यथा बाल्येऽपि सतः अनभिव्यक्तस्य सप्तमधातोः युवत्वे अभिव्यक्तिः तद्वत् इति।
3. ननु ज्ञानप्रसरणे किं प्रमाणम् इति चेत् उच्यते – इन्द्रियेण सह चैतन्यमपि निस्सृत्य तेनतेनार्थेन सन्निकृष्यते हस्तादिनेव त्वगिन्द्रियम्। अपि च 'प्रज्ञा च तस्मात् प्रसृता पुराणी' इति श्वेताश्वतरोपनिषद्वाक्यम्, 'तदस्य हरति प्रज्ञां वायुनाव मिवाम्भसि'इति गीतावचनम् (2-67), 'इन्द्रियाणां तु सर्वेषां यद्येकं क्षरतीन्द्रियम्। तेनास्य क्षरति प्रज्ञाद्दतेः पादादिवोदकम्'(2-99) इति मनुवचनञ्च ज्ञानप्रसरणे प्रमाणम्।

4. ननु आत्मगुणभूतायाः बुद्धेः द्रव्यत्वं कथम् इति चेत् – उच्यते – मणितरण्यादि गुणभूताया अपि प्रभाया यथा द्रव्यत्वं , तथा धर्मिभूतज्ञानरूपस्य आत्मनः गुणभूतायाः बुद्धेः धर्मभूतज्ञानस्य द्रव्यत्वमविरुद्धम्। अपि च न तावदस्माकम् अद्रव्यमेव गुण इति वैशेषिकादिवत् निर्बन्धः,यो यदाश्रितस्वभावः स तस्य गुणइति हि गुणलक्षणम् । न तु पारिभाषिकम्, सर्वव्यवहारविरोघात् अर्थात् दातृत्वादिष्वपि गुणत्वव्यवहारसत्वात् लोके । किञ्च गुणेषु कश्चिद्विशेषः द्रव्यात्मकगुणाः केवल गुणाश्चेति। तत्र सत्वादिषु गुणशब्दस्य मुख्यत्वम्, ज्ञानादिषु गौणत्वम् इति विवेकः।

5. ननु बुद्धेः द्रव्यत्वे किं प्रमाणम् इति चेत् – उच्यते –‘ बुद्धिः – द्रव्यं – प्रसरणादि मत्वात्’ संप्रतिपन्नवत् अथवा – ज्ञानं – द्रव्यं – संयोगान्यादृष्टान्यत्वे सति भावनाकारणत्वात् आत्मवत् – इत्याद्यनुमानं प्रमाणम्।

6. ननु आत्मधर्मभूतायाः बुद्धेः स्वाश्रयात् अन्यत्र गमनं कथं भवितुमर्हति? इति चेत् – उच्यते – पूर्वोक्तप्रभादृष्टान्तेन स्वाश्रयादन्यदेशगमनं संभवति ज्ञानस्य। अपि च आत्मानं विहायविषयेषु चरित्वा विच्छिन्ना बुद्धिः पुनरपि आत्मानमाश्रयति इति

 ISSN: 2277-2359

तु न संभवति। एवञ्च आत्मप्रहाणानभ्युपगमात् अविहायैवात्मानं इतस्ततः चेतना इन्द्रियादिद्वारा निस्सरति इति भावः।

7. ननु उपचयविरलभावाभावे परिमाणान्तरयोगः बुद्धेः कथं संभवति इति चेत्- उच्यते – यथा अधिकपरिमाणस्य अहेः कुण्डलीभावे अल्पपरिमाणत्वं दृश्यते तथा बुद्धेरपि । न च तावता बहुलविरलत्वादिप्रसङ्गः। अर्थात् तूलपिण्डादौ प्रचयादियोगिपरिमाणोत्कर्षे विरलावयवत्वदर्शनात् – भिदुरभागवत्स्वेव तथाव्याप्तेः।

8. ननु बुद्धेः अतीतानागतैः द्रव्यैःसह संयोगसंबन्धः कथम्? अर्थात् (जीवस्य) मुक्तिकाले धीसङ्कोचककर्मापगममात्रेण तत्क्षणादेव सकलब्रह्माण्डवर्तिद्रव्यसंयोगः कथं जायते ? इति चेत् उच्यते – अतीतानागततया तौ अद्यापि विद्येते इति तेन रूपेण मुक्तस्य (मुक्तिकाले) बोधसन्निकर्षे नानुपपत्तिः। अर्थात् यथा अतीतानागतेषु एकत्वादिव्यवहारात् सङ्ख्यायोगः, यथा वा विशिष्टाद्वैतसिद्धान्ते ब्रह्माण्डान्तरवर्तिनो देशविप्रकर्षेऽपि अण्डान्तरवर्तिपुरुषीयज्ञानेन शीघ्रसंयोगः, एवं कालविप्रकर्षेऽपि संयोग उपपद्यते।

ननु अतीतानागततया तौ अद्यापि विद्येते इत्ययुक्तम् तस्य स्वपरमतसंप्रतिपन्नत्वाभावात् इति चेत् – न – यथा कैश्चिदसतोरेव भूतभविष्यतोः सामान्यात्मना अद्यापिवृत्तेः, प्राकट्याश्रयत्वमुपपादितम्, तथा तद्द्रव्यात्मनाऽपि वृत्तेः संयोगोऽपि उपपन्न एवेतिभावः।

9. ननु बुद्धेः गुणादिभिः संबन्धः कथम्? इति चेत् – उच्यते – न हि गुणादिभिरपि संबन्धः संयोगः अपि तु संयोगिनिष्ठता। यथा वैशेषिकाणां मते घटरूपप्रत्यक्षजनने संयुक्तसमवायादिः।

10. ननु मध्यस्थितानां संबद्धानामप्रकाशत्वं कथम् इति चेत् – उच्यते- अस्य प्रश्नस्य नायनं तेजः निदर्शनम्। अर्थात् यथा सूर्यमण्डलपर्यन्तं प्रसृतनायनरश्मीनामान्तरालिकपरमाण्वाकाशादिसंयोगे सत्यपि न तेषां भानम्, तथा इति भावः।

11. ननु मुक्तबुद्धेः युगपत् क्रमेण वा अनन्तदेशसंयोगः कथम् संभवति इति पृष्टे उच्यते - (बुद्धेः) वेगातिशयः, शक्तिविशेषः, ईश्वरसङ्कल्पो वा प्रतिवक्तारः। इष्टं विचित्रवेगित्वं नायनतापनादिमहसाम्। तच्च निरतिशयप्राप्तं युगपत् त्रिचतुरक्षणेन वा, विश्वमास्कन्दते इति।

12. ननु व्याप्तायां स्वबुद्धिचन्द्रिकायां प्लवमानस्य स्वलालातन्तुविताने लगन्त्या लूतिकाया इव सञ्चाराधीनतत्तद्बुद्धिप्रदेशसंयोगस्य स्वबुद्ध्या सह बुध्यन्तरव्याबृत्तः स्वाभाविकः संबन्धः कथम् इति चेत् उच्यते – स्वाभाविकं तदीयत्वं तदाश्रितत्वञ्चेति सञ्चारेऽपि अर्थात् ज्ञानसञ्चारमन्तरेण जीवसञ्चारेऽपि न विरोधः। यथा व्यापकात्मवादिनः अर्थात् आत्मसञ्चारमन्तरेणापि शरीरादीनां सञ्चारदर्शनेन तत्सञ्चारानुविधायिसञ्चारत्वाभावात् शरीरेन्द्रियादीनाम्, यथैव ईश्वरमनुमन्यमानस्य तदीशितव्यानाम्, यथा वा लोके दासभृत्यादिद्वन्द्वनाम् (द्वन्द्वम्-मिथुनम् दासदासीजनानामित्यर्थः), यथा च प्रभाप्रभावदादेः, यथा च वैशेषिकादीनां चलाचलत्वेऽपि (अर्थात् शाखायां चलन्त्यामपि वृक्षस्याचलत्वदर्शनात्) अयुतसिद्धयोःअवयवावयविनोः, यथा च अस्मत्पक्षे शरीरिणः पुरीतदादिसञ्चारेऽपि शरीराणाम्, इत्यलम् अतिविस्तरेण।

विशिष्टाद्वैतमते बुद्धिरेव उपाधिभेदात् सुखदुःखेच्छाद्वेषप्रयत्नरूपा। सुखादिजनकतया अभ्युपगतज्ञानातिरेके प्रमाणाभावात्। अर्थात् 'इच्छामि''द्वेष्मि' इत्यादिव्यवहारस्य स्मरामि इत्यादिवत् ज्ञानविशेषेणैव उपपत्तेः। वैषयिकसुखदुःखरूपत्वं ज्ञानस्य

विषयाधीनमिति अनुकूलत्वप्रतिकूलत्वाविशेषात् विषयस्यापि सुखदुःखशब्दवाच्यत्वमस्त्येव इति सङ्क्षेपः।

वैशेषिकमते सुखदुःखेच्छाद्वेषाः पृथक् गुणाः। (अर्थात् ज्ञाने अन्तर्भावः नाङ्गीक्रियते इति विशेषः) सर्वव्यवहारहेतुः ज्ञानम्। ज्ञानत्वजातिमत्वं ज्ञानस्य लक्षणम्। ज्ञानं द्विविधम् स्मृतिः अनुभवश्चेति। तत्र भावनाख्यसंस्कारेतरचक्षुराद्यजन्यत्वविशिष्ट भावनाख्य संस्कारजन्यत्वे सति ज्ञानत्वं स्मृतेः लक्षणम्। यदि ज्ञानत्वमात्रं स्मृतिलक्षणं स्यात् तदा ज्ञानत्वस्य अनुभवेऽपि सत्वात् अनुभवेऽतिव्याप्तिः। अतः संस्कारजन्यत्वं लक्षणे निवेश्यम्। अनुभवे संस्कारजन्यत्वाभावात् नातिव्याप्तिः। यदि संस्कारजन्यत्वमात्रं स्मृतिलक्षणं स्यात् तदा ध्वंसं प्रति प्रतियोगिनः कारणतया संस्कारमात्रजन्यत्वस्य संस्कारध्वंसे सत्वादतिव्याप्तिः। अतोज्ञानत्वनिवेशनम्। संस्कारध्वंसे ज्ञानत्वस्याभावात् नातिव्याप्तिः। संस्कारेतराजन्यत्वविशिष्ट ज्ञानत्वमात्रस्य स्मृतिलक्षणत्वे अजन्ये ईश्वरज्ञानेऽतिव्याप्तिः। अतः संस्कारजन्येतिविशेषणम्। न च ईश्वरज्ञानस्य जन्यत्वविशेषणेनैव वारणसंभवात् – संस्कारपदं व्यर्थमिति वाच्यम्। योगिज्ञानेऽतिव्याप्तेः। तस्य योगजन्यत्वात् ज्ञानत्वाच्च। नच

योगिज्ञानस्य योगजत्वात् संस्कारेतराजन्यत्वविशेषणेनैव अतिव्याप्तिवारणसंभवात् संस्कारपदं व्यर्थमितिवाच्यम्। स्मृतेरपि संस्कारेतरमनोजन्यत्वेन तदजन्यत्वाभावात् असंभवः। तद्वारणाय संस्कारेतरपदस्य बहिरिन्द्रियपरतया व्याख्येयतया योगिज्ञाने बहिरिन्द्रियाजन्यत्व- ज्ञानत्वानां सत्वात् तत्रातिव्याप्तेः। अतः तद्वारणाय संस्कारपदं स्मृतिलक्षणे निवेश्यम्। संस्कारजन्यत्वे सति ज्ञानत्वमात्रोक्तौ सोऽयं देवदत्तः इति प्रत्यभिज्ञायामतिव्याप्तिः। तस्या इदन्त्वांशे चक्षुरादिजन्यत्वेऽपि तत्तांशे संस्कारजन्यत्वेन संस्कारजन्यत्वज्ञानत्वयोः तत्र सत्वात्। मात्रपदनिवेशेतु प्रत्यभिज्ञाया इदन्त्वांशे बहिरिन्द्रियचक्षुर्जन्यतया

तदजन्यत्वाभावात् नातिव्याप्तिः। एवञ्च लौकिकविषयताशून्यत्वे सति संस्कारजन्यत्वे सति ज्ञानत्वम् इति स्मृतेः निष्कृष्टं लक्षणं भवति।

स्मृतिभिन्नत्वे सति ज्ञानत्वम् अनुभवस्य लक्षणम्। ज्ञानत्वमात्रोक्तौ स्मृतौ अतिव्याप्तिः, स्मृतिभिन्नत्वमात्रोक्तौ घटादौ अतिव्याप्तिः च संभवति। अतः दलद्वयम् उपादेयम्।

अनुभवः द्विविधः – यथार्थः अयथार्थश्चेति। तत्र यथार्थानुभवः चतुर्विधः - प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। अयथार्थानुभवः[18] त्रिविधः। संशय-विपर्यय-तर्कभेदात्।

स्मृतिरपि[19] द्विविधा- यथार्था अयथार्था च इति। प्रमाजन्या यथार्थस्मृतिः, अप्रमाजन्या अयथार्थस्मृतिः इति सर्वं सुस्थम्।

**सन्दर्भग्रन्थसूची –**

न्यायसिद्धाञ्जनम्

तर्कसङ्ग्रहः

[18] तर्कसङ्ग्रहः

[19] तर्कसङ्ग्रहः

 ISSN: 2277-2359

# शब्दशासनमीमांसा

**डा.उमेशचन्द्रमिश्रः,**

सहायकाचार्यः, व्याकरणविभागः

केन्द्रीयसंस्कृतविश्वविद्यालयः

गुरुवायूरपरिसरः

**सारांशः**

व्याकरणशास्त्रस्यापरनाम शब्दशासनशास्त्रम्। अथ महाभाष्ये भगवान् पतञ्जलिः व्याकरणशास्त्रस्य व्याख्यां कुर्वन्नाह अथ शब्दानुशासनमिति। तस्यैव व्याकरणशास्त्रस्य यद्यपि सन्त्यनेके प्रवर्तकाः तथापि ब्राह्मसम्प्रदायस्यादिमप्रवर्तकः ब्रह्मा माहेश्वरसम्प्रदायस्य च शिव इति स्मर्यते। इतोऽपि दश शाकटायनगार्ग्यगालवादयः पाणिनेः स्मृतवैयाकरणाः, इन्द्रचान्द्रपुष्करसादयः दश पाणिनेः अस्मृतवैयाकरणाः। एषा गङ्गायाः अविरलधारा इव नित्यनिरवच्छिन्ना व्याकरणपरम्परा नित्यं प्रवहति। तस्यैव व्याकरणशास्त्रस्य सर्ववेदपारिषदभूतस्य मूल्यं लोके ख्यापयितुं शब्दशासनमीमांसाख्यलेखः लघुकथारूपेण प्रस्तौमि।

**कुञ्चिकापदानि**

पाणिनिस्मृतवैयाकरणाः, पाणिनि-अस्मृतवैयाकरणाः, सर्ववेदपारिशदमूलम्, स्फोटः, ध्वनिः, प्रयोजनानि।

**विषयनिरूपणम्**

काञ्चिन्महतीं विद्वन्मण्डलमण्डितां राजसभामालोक्य कश्चिद्वैयाकरणो द्विजवाल आह स्म। अहो अद्य इज्येनापि पूज्यायामस्यां राजसभायां विबुधाचार्य्या इव वीर्य्यवन्तो महान्तो ग्रन्थाचार्य्याः लक्ष्यन्ते। वतास्माकमद्य रात्रिः सुप्राता किमिदं सुदिनाहम्। प्रायः प्राक्तनं सुकृतमद्येव नः फलवत् संवृत्तम्। नयने च नोऽद्य सफलजन्मतामासीदसताम्। धन्या वयं यतोऽस्माभिर्देवैरपि दुर्द्दर्शनान् सर्व्वदर्शननिर्म्मलदर्शनान् दीर्घदर्शिनोऽयत्नादेवाद्य दर्शनातिथित्वमनायि।

है पुण्यदर्शनाः भवतां दर्शनैवाहं निजनयनेऽपाविषम्। अधुनाम्नायाम्नानपरिपूतवाग्भिर्भवद्भिः संलापलवेनापि वाणीमात्मनः पिपविषे। तन्मामाज्ञापय किञ्चिद्विवक्षुं वाचयितुम्। अथ वाचयवाचयेति कौतुकरसाभिषिक्तचेतोभिर्विपश्चिद्भिरनुज्ञातो वक्तुमारभत।

अथ परमकारुणिकः सर्व्वज्ञः सर्व्वनियन्ता निखिलजगदेकनिदानभूतो भगवान्नारायणोऽखिलमर्त्त्यानां संसारतत्त्वप्रतिपत्तये कर्तव्येषु प्रवर्तनायाकर्त्तव्येभ्यो निवर्त्तनाय ब्रह्मतत्त्वोपलम्भाय च ब्रह्माणमाविर्भाव्य तन्मुखेनैव सकलशास्त्रमूलभूतान् चतुरो वेदानाविश्चकार। अथ स एव परंब्रह्मतत्त्वप्रतिपादकशब्दब्रह्मविज्ञप्तये ज्ञानविज्ञाननिधिं भगवन्तं महेशं सृष्ट्वा तेनैव माहेशाख्यं वेदाङ्गेषु प्रधानभूतं शब्दशासनपारावारं चाविर्भावयामास।

ततस्तानेव वेदान् तञ्च शब्दशास्त्राम्बुधिमालम्व्य आदिमैर्मरीच्यादि – नारदान्तैः महर्षिभिर्धर्म्मतत्त्वज्ञैः मन्वादिभिर्वाल्मीकि – भरतादिभिरादिकविभिः वेदविभाजकैः नानापुराणेतिहास – प्रवर्त्तकैर्व्वेदव्यासादिभिः – कपिल – गौतमादिभिः दर्शनप्रणेतृभिर्महामुनिभिश्च भूयांसि शास्त्रजालानिप्रणिन्यिरे। उक्ताच्च माहेशाभिधानशब्दशासनात् गालवापिशलि – चाक्रवर्म्मण – स्फोटायन – काश्यप – गार्ग्य –भारद्वाज – सेनक – शाकटायन – साकल्य - पाणिनिप्रभृतयो महामुनयो महार्णवात् सलिलकतिपयमिव कियन्तं

भागमुद्धृत्य एकैकं शब्दशासनं निर्ममूः। किन्तु माहेशाख्यशब्दाम्बुधेः पारं न ययुः। तदुक्तं कात्यायनेन– अहं च भाष्यकारश्च कुशाग्रीवधियावुभौ। नैव शब्दाम्बुधेः पारं किमन्ये जडबुद्धय इति। यान्युज्जहार माहेशाद्व्यासो व्याकरणार्णवात्। तानि किं पदरत्नानि सन्ति पाणिनि-गोष्पदे इत्यप्यन्यैरुक्तम्। गालवादिप्रणीतानि व्याकरणानि कुत्राप्यधुना न लक्ष्यन्ते शाकटायनस्फोटायनाद्याचार्यास्तु केवलं पाणिनीयसूत्रेषु नामस्मरणमात्रेण स्मर्यन्ते। पाणिनिमुनिप्रणीतन्तु व्याकरणं भारतभूमौ सर्व्वत्र निरन्तरं भास्करवद्वाभासते॥ पाणिनिर्नाम पणिनवंशसमुद्भूतो दाक्षीसुतो मुनिविशेषः। तस्य आहिक-दाक्षीपुत्र-शालङ्किन्-पाणिन-शालातुरीय इति पञ्च नामानि कोषादौ प्रसिद्धानि। स चोग्रेण तपसा भगवतो महेश्वराल्लब्धवरो व्याकरणं सुमहत्तरं विरचयाम्बभूव। तच्च व्याकरणं पाणिनीयाष्टकमित्याख्यया प्रसिद्धम्। कात्यायनो नाम महामुनिरस्य वार्त्तिकं विरच्य तीव्रतरसमालोचनाञ्चकार। अनन्तरं पतञ्जलिर्नाम महर्षिः पाणिनीयाष्टकस्य वार्त्तिकस्य च महाभाष्यं विधाय पाणिनीयाष्टाध्यायीग्रन्थं सर्व्वतः प्रमादपरिशून्यतया प्रदर्शयन् कात्यायनतीव्रदृष्टितो ररक्ष। तेन यथोत्तरं मुनीनां प्रामाण्यमिति वचनं

लोकेषु प्रसिद्धम्।अतः सर्व्वोत्तमतया सर्व्वलोकसमादरणीयमिदं व्याकरणम्। अत्र च सूत्राणि ३९९६ षण्णवत्यधिकनवशतोत्तरत्रिसहस्रसंख्यकानि॥ कात्यायनस्य महामुनेरलौकिकी ग्रन्थकरणशक्तिरासीत्। येन महात्मना सप्तलक्षसंख्यकश्लोकमयो बृहत्कथाभिधानो विशालतरो ग्रन्थो विरचयाम्बभूव। तदाधारेण गुणाढ्यनामाचार्येण विरचिता बृहत्कथामञ्जरी। तस्मादेव कियन्तं सारांशं समुद्धृत्य सोमदेवभट्टः कथासरित्सागरं नाम ग्रन्थं विनिर्ममे। तस्माच्च कथासरित्सागरात् कञ्चित् क्षोदीयांसमंशं संगृह्य कविकुलचूडामणिना बाणभट्टेन कादम्बरी नाम्नी कथा विरचिता। परमकारुणिको भगवाननन्तभक्तानां कायवाक्चित्तशोधनाय पतञ्जलिनामा मुनिर्भूत्वा आयुर्वेदं पाणिनिसूत्राणां महाभाष्यं पातञ्जलाख्यं योगशास्त्रं च वितेने। तस्य भाष्यकार-गोनर्द्दीय-चूर्णिकृत् इति नामत्रयं प्रसिद्धम्॥

यस्य पाणिनिमुनिप्रणीतव्याकरणस्य अगाधविद्यापारावारो महात्मा कात्यायनो महर्षिर्व्वार्त्तिककारो बभूव।

पातञ्जलाख्ययोगशास्त्रप्रणेता भगवान् पतञ्जलिर्यस्य महाभाष्यं प्रणिनाय। तस्माद्व्याकरणादुत्कृष्टं व्याकरणं भुवि किमस्ति?

कलापचन्द्रवामनाद्याख्यानि तु व्याकरणानि पाणिनिवन्न महोत्कर्षं भजन्ते पाणिनिव्याकरणस्य मुनिप्रणीतत्वात् महामुनिद्वयकृतवार्त्तिकमहाभाष्यविभूषितत्वात् इतरबहुतरनिबन्धृनिबद्ध-व्याख्याकलापकलापितत्वात् प्राचीनतमत्वात् लौकिकवैदिकोभयशब्दसाधनत्वेन स्वरादिप्रतिपादकत्वेन च वेदोपकारकत्वाच्च।

इदमेव पाणिनिदर्शनमित्युच्यते माधवाचार्य्यादिभिः प्राचीननिबन्धृभिः। संस्कारपदवेदनीयशब्दानुशिष्टिद्वारा परंब्रह्मतत्त्वप्रदर्शकत्वात्। तदुक्तमभियुक्तैः "द्वे ब्रह्मणि वेदितव्ये शब्दब्रह्म परं च यत्। शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति इति॥"[१] शिक्षाकल्पादिषु षड्सु वेदाङ्गेषु इदमेव परमोत्तमं वेदाङ्गं सर्व्वैरादरणीयम्। प्रधाने हि कृतो यत्नः फलवान् भवतीति न्यायात्। व्याकरणशास्त्रं वेदपुरुषस्योपकारकमिति वेदाङ्गम्। व्याकरणशास्त्रं स्वरविशेषस्य निर्णये पदार्थविशेषस्य च ज्ञाने सहायकम्। यथा

 ISSN: 2277-2359

ज्योतिषशासत्रमनुष्ठानविशेषस्य प्रारम्भाय कालविशेषस्य निर्धारणे सहायकम्। निरुक्तं तु व्याकरणशास्त्रस्य परिशिष्टप्रायमस्ति। यतोहि तत्र बाहुलकादिसाध्यानां लोपागमवर्णविकारादिना निष्पन्नानां पदानां निर्णयो वर्तते। छन्दोविचितिरपि गायत्र्युष्णिगादिलक्षणज्ञानेन यजनादिषु विध्यर्थनिर्णये उपयुज्यते। शिक्षाशास्त्रं वर्णोच्चारणप्रकारं स्थानकरणादिकं निर्दिशति। कल्पसूत्राणि प्रकरणान्तरपठितस्य न्यायलब्धस्य शास्त्रान्तराधीतस्य चाङ्गजातस्योपसंहरेण यज्ञशालादिनिर्माणे ज्यामितिकोपयोगस्य प्रयोगं दर्शयन्ति। तेषु पदपदार्थावगमकत्वेन वाक्यार्थज्ञानं तन्मूलकमस्तीति सकलशास्त्रमूलत्वात्व्याकरणशास्त्रं प्राथम्यं भजते। अत एव व्याकरणशास्त्रं शिक्षाशास्त्रे मुखत्वेनोपवर्णितम्। मन्वादिस्मृतिशास्त्रेष्वपि शास्त्रमिदमङ्गत्वेन कीर्तितम्। तेनाध्ययनविधिर्व्याकरणाध्ययनस्यानुष्ठापक इति स्थितम्। तथा च नित्यकर्मणः सन्ध्योपासनादेरभावे "यथाऽहरहः सन्ध्यामुपास्यतः"[२] विधेरुल्लङ्घनात् प्रत्यवायानुष्ठानेन च पापक्षय इति यथाभ्युपेते तथा व्याकरणाध्ययनस्याप्यननुष्ठाने अनुष्ठाने च भवेत्। भाष्ये शब्दानुशासनस्य प्रयोजनत्वेन रक्षाप्रभृतीनि फलत्वेनोक्तानि। अत्र

 ISSN: 2277-2359

प्रयुज्यते प्रवर्त्यतेऽनेनेति व्युत्पत्या करणे ल्युट्प्रत्यये वा प्रयोजयतीति कर्तृव्युत्पत्या बाहुलकात्ल्युटि फलपरको वा प्रवर्तकविधिपरकः प्रयोजनशब्दः। उभयोः “नपुंसकमनपुंसकेनैकवच्चान्यतरस्याम्”१-२-६९ इति सूत्रेण नपुंसकस्यैकशेषे एकवद्भावस्य वैकल्पिकत्वमस्तीति प्रश्नस्थे प्रयोजनपदे बहुवचनसत्त्वेप्युत्तरस्थे प्रयोजनपदे एकवचनम्। तत्र रक्षा नाम वेदस्य संरक्षणम्। लोके यद्यपि लोपागमवर्णविकाराः न भवन्ति वेदे तु एते अवश्यं भवन्तीति तदर्थं व्याकरणमध्येयम्। ते केवलप्रयोगसरणैः प्रामादिकाः सम्भाव्येरन्। वैयाकरणस्तु लक्षणदर्शीलक्षानुसारं लक्षणं प्रवर्तयतीति तदेव रूपं स्थापयति। लोपोदाहरणं यथात्मना विविदे मितद्रुः। अत्र त्मना आत्मनेत्यर्थः। “मन्त्रेष्वाङ्यादेरात्मनः”६-४-१४१ सूत्रेणाकारलोपः। आगमो यथा देवासः, ब्राह्मणासः। “आज्जसेरसुक्” ७-१-५० सूत्रेणासुगागमः। लोपागमौ यथा- देवा अदुह्र। अदुहतेत्यर्थः। अत्र दुहधातोर्लङि झस्यादादेशे लोपस्त“आत्मनेपदेषु” ७-१-४१ इति तलोपः, “बहुलं छन्दसि” ७-४-७८ इति रुडागमः। वर्णविकारो यथा- गृभ्णामि ते सौभगत्वाय। “हृग्रहोर्भश्छन्दसि हस्येति वक्तव्यम्” इति भकारः।

ऊहोऽपि प्रयोजनम्। "प्रकृतिवत् विकृतिः कर्त्तव्या"[३] नाम। यत्राङ्गजातं सम्पूर्णमुपदिष्टं सा प्रकृतिः। यथा- दर्शपूर्णमासः। यत्र नोपदिष्टं सा विकृतिः यथा- "सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः"[४] इति विहितो यागः। अत्र वैकृतस्य विधेर्विषयिभूतानां भावनायां करणीभूते यागे उपकारकाकांक्षया तन्मुखेन प्राकृतमङ्गजातं प्राप्यते। वैदिके करणे तादृशानामेवाङ्गानामपेक्षितत्वात्। तेषामेव प्रकृतौ क्लृप्तसामर्थ्यात्। तद्विशेषस्य चैकदेवतात्वादिना शक्यज्ञानत्वात्। तेनेदं पूर्वमीमांसावचनम्। तत्र यस्याङ्गस्य प्रकृतौ य उपकारः क्लृप्तस्तस्य विकृतासम्भवे निवृत्तिः। यथा- प्रकृतावघातस्य वैतुष्यमुपकारतया क्लृप्तं तस्य कृष्मलेष्वसम्भवादवघातस्य निवृत्तिः। तत्र प्रकृतौ यस्य मन्त्रस्य यदभिधेयं तच्चेद्विकृतौ साकल्येन नास्ति तदा कृत्स्नस्य मन्त्रस्य निवृत्तिः। यथा-"अवरक्षो दिवः सपत्नं वध्यासम् इत्यवघातमन्त्रस्य कृष्णलेषु"[५]। यस्य त्वेकदेशस्याविधेयं नास्ति तस्य तावन्मात्रं निवर्तते। यथा- अग्नये त्वा जुष्टं निर्वपामि। इत्यस्य मन्त्रस्यावयवभूतदेवताभिधायि पदमौषधद्रव्यकत्वेन एकदेवताकत्वेन चाग्नेयविकारभूते सौर्ये निवर्त्तते अग्निशब्दश्च लुप्तद्वारकतया निवर्तमाने एकारोपि निवर्त्तते। अकारान्तेतरप्रकृतिसन्निधानेनैव हि एकारस्य सम्प्रदानं वाच्यम्,

अकारान्तात्तु यशब्दस्य। ततश्चतुर्थ्यन्तसूर्यायेत्याद्युदात्तमग्नय इत्यस्य मध्योदात्तस्य स्थाने ऊह्यम्। सोऽयं प्रकृत्यूहः। क्वचिल्लिङ्गस्याप्यूहः यथा- देवीरापः शुद्धाः स्थ इत्यप्सु विनियुक्तो मन्त्रः। तस्याज्ये ऊहः देवाज्यशुद्धमसीतिः। क्वचित्प्रत्ययमात्रस्योहः यथा- मा भेर्मा संविक्थाः इति पुरोडाशेऽवदानमन्त्रः। तस्य धानासूहः- मा भैष्ट मा संविजिध्वम् इत्यादिरिति हरदत्तादयः। याज्ञिकास्तु संविग्ध्वमित्यूहमाहुः। युक्तं चैतत्, प्रकृतावनिङ्कतया विजिर् पृथग्भावे इत्यस्य प्रयोगो न तु ओविजी भयचलनयोः इत्यस्येत्यवधारणम्।

लाघवमपि प्रयोजनम्। तथाहि, अध्यापनं ब्राह्मणस्य वृत्तिः। तन्निर्वाहश्च वैदुष्याधीनः। वैदुष्यञ्च साध्वसाध्वविवेकः। स च प्रतिपदपाठादिना न सम्भवति। शब्दानामानन्त्यात् तस्मादुत्सर्गापवादरूपलक्षणद्वारा तद्बोधने लाघवम्। अन्यथा तु गौरवम्।

असन्देहोऽपि प्रयोजनम्। तथाहि स्थूलपृषतीमनड्वाहामालभेत इति वेदे श्रूयते। तत्र सन्देहः कर्मधारयोऽयं बहुव्रीहिर्वेति। कर्मधारयपक्षे पृषती शब्देन मत्वर्थलक्षणया पृषत्त्वती बिन्दुमती गौरेवाभिधीयते, स्थूलापि सैव, बिन्दूनां स्थौल्यं तानवं वा यथा तथाऽस्तु। बहुव्रीहौ तु

स्थौल्यं पृषत्स्वेवेति। गौस्तु स्थूला कृशा वेत्यत्रानादरः। तत्र लकाराकारे उदातत्वं दृष्ट्वा पूर्वपदप्रकृतिस्वरेण बहुव्रीहि वैयाकरणो निश्चिनोति। ततश्च निश्चयेन प्रतिबन्धात्संशयानुत्पादः। स एवासन्देहः। एवं इन्द्रपीतस्योपहूतो भक्षयामीति वाक्ये स्वरेणैव बहुव्रीहिनिर्णये मीमांसकानामिन्द्रपीताधिकरणमवैयाकरणान्प्रति सार्थकम्।

तदेवं रक्षोहालाघवासन्देहाख्यानि चत्वारि फलानि व्याख्यातानि। आगमस्तुप्रवर्तकः। भाष्ये तु सन्दर्भशुद्ध्यर्थं फलचतुष्टयस्य प्राक् पश्चाद्वा प्रवर्त्तके वक्तव्ये मध्ये तदुक्त्या फलसन्देशेन नित्यानामपि फलपर्यवसानमस्तीति सूचितम्। फलन्तु पापक्षयः प्रत्यवायानुत्पत्तिर्वा, तथाहि धर्मेण पापमपनुदतीति धर्मशास्त्रवचनम्-

“विहितस्यानुष्ठानान्निन्दितस्य च सेवनात्।

अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति।।”[६]

तदुक्तमाचार्य्यैः– “आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः। प्रथमं छन्दसामङ्गमाहुर्व्याकरणं बुधा” इति।[७]

व्याकरणशास्त्रस्य शब्दानुशासनमेवसाक्षात्प्रयोजनं वेदरक्षादीनि तु प्रयोजनप्रयोजनानि परम्परयेत्याह भगवान् भाष्यकारः।

शव्दानुशासनबलात् साधुशब्दप्रयोगोऽभ्युदयमादधाति इति। तदेवोक्तं भगवता कात्यायनेन "शास्त्रपूर्व्वके प्रयोगेऽभ्युदयस्ततुल्यं वेदशब्देनेति।"[८] अत्र श्रुतिरपि तमेवार्थमाह "एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके च कामधुग्भवतीति।"[९] शब्दस्य सम्यक् ज्ञातृत्वं व्याकरणशास्त्राध्ययनेन जायते। तथा च शब्दस्य सुप्रयोगे दक्षाः वेदादिशास्त्राध्यनेन सम्पद्यन्ते। तेन शास्त्रकाराः साहित्यं व्याकरणशास्त्रस्य पुच्छभूतं शास्त्रमिति वदन्ति। तथोक्तम्- नाकमिष्टसुखं यान्ति सुयुक्तैर्बद्धवाग्रथैः। अथ पत्काषिणो यान्ति ये चोक्तमतभाषिण इति।

अत्र केचिद्भ्रान्ताश्चोदयन्ति "अचेतनस्य शब्दस्य कथमीदृशी शक्तिः समुपपद्यत" इति। तत्र शब्दब्रह्मविदामिदं प्रतिवाक्यम्। "रे भ्रान्ताः नैवं मन्यध्वम्। श्रूयतां तावदस्माकं सिद्धान्तः। महादेवेन शब्दस्य साम्यं श्रुतिराह। तथा च श्रुतिः। "चत्वारि श्रृङ्गाः त्रयोऽस्य पादा द्वे शीर्षे सप्तहस्तासोऽस्य त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्या आविवेश"[१०] इति। व्याख्याता चेयं भाष्यकारेण। चत्वारि श्रृङ्गाः चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताः। त्रयोऽस्य पादाः लडादिविषयास्त्रिधाभूतभविष्यद्वर्त्तमानकालाः। द्वे शीर्षे द्वौ शब्दौ

नित्यानित्यात्मानौ। नित्यः कार्य्यश्च व्यङ्ग्यव्यञ्जकभेदात् वा ध्वनिस्फोटभेदात्। सप्तहस्तासोऽस्य तिङा सह सप्तसुव्विभक्तयः। त्रिधा बद्धः उरसि कण्ठे शिरसि च बद्धः। वृषभ इति प्रसिद्धवृषभेण रूपणं क्रियते। रोरवीति शब्दं करोति। रौतिः शब्दकर्म्मा। इह शब्द शब्देन प्रपञ्चो विवक्षितः। महोदेवो मर्त्त्या आविवेश। महान् चासौ देवः महादेवः इति शब्दः मर्त्या मरणधर्म्माणो मनुष्याः तान् आविवेश इति महता देवेन परंब्रह्मणा साम्यमुक्तं स्यादिति जगन्निदानः स्फोटाख्यो निरवयवो नित्यः शब्दो ब्रह्मैवेति। अत एव हरिणा उक्तं ब्रह्मकाण्डे "अनादिनिधनं ब्रह्मशब्दतत्त्वं यदक्षरम्। विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यत"[११] इति।

इत्थञ्च शब्दशासनबलाच्छब्दब्रह्मप्रतिपत्या परब्रह्मप्रतिपत्तिरिति शब्दशासनशास्त्रस्य निःश्रेयससाधनत्वं सिद्धम्। इदञ्च शब्दशासनाख्यं पाणिनिदर्शनं सर्व्वेभ्यो दर्शनेभ्यः प्रधानतमम्। इतराणि दर्शनानि तु बहुषु स्थानेषु वेदविरुद्धमर्थं प्रतिपादयन्ति। क्वचिच्च वेदानां वास्तविकमर्थमुच्छिद्य स्वमतसिद्ध्यनुकूलमर्थान्तरं परिकल्प्य तान् व्याकुलयन्ति। किञ्च निखिलान् वेदभागानसमालोच्य स्वमतानुकूलं कियन्तभागमालम्ब्य स्वाभिमतार्थं प्रमाणयन्ति। इदन्तु पाणिनिदर्शनं

क्वापि न वेदं विरुणद्धि प्रत्युत प्रकृतिप्रत्ययविभागेन वेदशब्दानां तात्पर्य्यं व्यनक्ति। सर्व्वेषामेव वेदानामर्थप्रतिपत्तये तत्प्रतिपित्सूनां तदनुकूलां शक्तिं चादधाति। इदञ्च दर्शनं वाङ्गलविशोधनं पवित्रं मोक्षद्वारं सर्व्वविद्याप्रधानं मोक्षसोपानपर्व्वणां प्रथमं पदस्थानं सर्वेषु मोक्षमार्गेषु सरला राजपद्धतिश्चोच्यते। तदुक्तमभियुक्तैः-"तद्वारमपवर्गस्य वाङ्गलानां चिकित्सितम्। पवित्रं सर्व्वविद्यानामधिविद्यं प्रचक्षते"[१२] इति। तथा- "इदमाद्यं पदस्थानं सिद्धिसोपानपर्व्वणाम्। इयं सा मोक्षमार्गाणां सरला राजपद्धतिरिति।"[१३] इदञ्च शब्दशासनं वेदवत्पवित्रं पाठात् पुण्यप्रदञ्च। अत एवेदं पारम्परिकाः प्रातःस्नात्वा प्रयताः प्रत्यहं प्रपठन्ति।

इत्थं शब्दशासनप्रशंसापराणि अविप्लवानि शुचीनि मनोहराणि विषदार्थानि अर्थगौरवशालीनि पौनरुक्त्यादिदोषशून्यानि साकाङ्क्षाणि योग्यानि आसन्नानि सुमधुराणि वागीशस्येव द्विजवालस्य वचनानि समाकर्ण्य सर्व्वे सामाजिका विद्वांसोऽतितरां विसिष्मियिरे। वेदवचनैर्बाहुमुत्तोल्य तस्योच्चैराशिषमुचुश्चेति।

**सन्दर्भाः-**

१.मैत्रायण्पनिषद्, ६-१२

२.शब्दकौस्तुभम्, व्याकरणप्रयोजनम्

३.महाभाष्यम्, प्रथमाह्निकम्, ऊहशब्दनिरूपणम्, प्रदीपव्याख्या

४.महाभाष्यम्, प्रथमाह्निकम्, ऊहशब्दनिरूपणम्, प्रदीपव्याख्या

५.महाभाष्यम्, प्रथमाह्निकम्, ऊहशब्दनिरूपणम्, तत्वालोके

६. शब्दकौस्तुभम्, व्याकरणप्रयोजनम्

७.वाक्यपदीयम्, ब्रह्मकाण्डम्, श्लोकसंख्या-११

८.महाभाष्यम्, प्रथमाह्निकम्, आचारे नियमः

९.महाभाष्यम्, एकः पूर्वपरयोः ६-१-८४ सूत्रम्

१०.महाभाष्यम्, प्रथमाह्निकम्, व्याकरणगौणप्रयोजनम्

११. श्रीमद्भगवद्गीता,८-१३

१२.वाक्यपदीयम्, ब्रह्मकाण्डम्, श्लोकसंख्या-१४

१३.वाक्यपदीयम्, ब्रह्मकाण्डम्, श्लोकसंख्या-१६

**सहायकग्रन्थसूची-**

१.वैयाकरणसिद्धान्तकौमुदी, सं-म.म. श्रीगिरिधरशर्मा, प्रकाशकः-

मोतिलाल वनारसीदास, देहली-१९९७

२. व्याकरणमहाभाष्यम्, पुनर्मुद्रण-१९८८, चौखम्बासंस्कृतप्रतिष्ठान, दिल्ली

३. पाणिनीय अष्टाध्यायीसूत्रपाठः सम्पादकः पं. सत्यनारायणशास्त्री, कृष्णदास अकादमी, वारणासी-२०१२.

४. वैयाकरणसिद्धान्तकौमुदी- तत्वबोधिनीसहिता, चौखम्वा विद्याभवन, वारणासी-२००६

५. अष्टाध्यायी सहजबोधः, पुष्पा दीक्षित, पाणिनीयशोधसंस्थान, छत्तीशगड-२००४

६.नन्दिकेश्वर काशिका, नन्दिकेश्वर, चौखम्वा, १९६६

७.परिभाषेन्दुशेखरः, डा. गिरगजेशकुमारदीक्षित, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वारणासी

८. शब्दकौस्तुभः, सम्पादकौ- विन्ध्येश्वरीप्रसाद द्विवेदी, गणपतिशास्त्री मोकाटे, चौखम्वा संस्कृत सीरीज आफिस, वारणासी-१९९१

# संस्कारेषु नामकरणसंस्कारस्योपयोगिता

**डा. बि. नरेशकुमारनायकः**

सहायकाचार्यः, शिक्षाशास्त्रविभागः

गुरुवयूरपरिसरः, पुरानाट्टुकरा, त्रिश्शूर्,केरलम्

ईमैलः- dr.b.naresh@csu.co.in

दूरवाणीसंख्या:- 8919709028, 9948232019

**शोधसारः**

भारतीयपरम्परायां ऋषिभिः मुनिभिः आपूर्त्ता वर्तते। ऋषिभिः प्रचालितायाः वैदिकपरम्परायाः जीवनचर्यायाश्च अनुकरणं कुर्वन् जनाः श्रेष्ठम्, उन्नतं जीवनं, दिनचर्याञ्च प्राप्य सम्पूर्णमपि जीवनं वैदिकपरम्परानुगुणं यापयित्वा समाजाय सुसन्ततयः प्रदातुं शक्नुवन्ति। सुजनेभ्यः एव परिवारस्य, समाजस्य, राष्ट्रस्य निर्माणं भवितुं शक्नोति। एभ्यः विविधेभ्यः संस्कारेभ्यः एव सामान्यजीवनं श्रेष्ठजीवनं भविष्यति। अतः समेषां संस्काराणाम् अनवरततया अनुकरणं समाजे भवेत्, तर्हि समाजस्य दशा, दिशा, अवस्था इत्यादीनाम् उत्तमं परिवर्तनं दृग्गोचरी भविष्यति।

**संङ्केतशब्दाः**

गुणान्तराधानम्, ब्रूहदारण्यकोपनिषद्, शथपथब्राह्मण, संस्कारः, परमात्मनः, श्रेष्ठत्वम्, वसुधैवकुटुम्बकम्, गोभिलगृह्यसूत्रम्, आश्वलायनगृह्यसूत्रम्, पारस्करगृह्यसूत्रम्।

## भूमिका

किं नाम संस्कारः ? प्रश्ने सति समाधानं भवति यत् - कस्यापि वस्तुनः स्वरूपे परिवर्तनम् वस्तुनि नूतनस्वरूपस्याधानम्। अत एव भारतीयसंस्कृतौ षोडशसंस्काराणां व्यवस्था विहिता। मानवः परमात्मनः उत्तमा कृतिः वर्त्तते। सः जीवने श्रेष्ठत्वं प्राप्येत तदर्थं यथा समयं संस्काराणां उपक्रमः वर्तते। यथा स्वर्णकारः स्वर्णम् अङ्गारिकायां निक्षिपति तत्र पूर्णतया संस्कृतं करोति तदनन्तरमेव सुवर्णं नूतनस्वरूपे उपस्थापयति। तथैव शिशुः यदा मातुः गर्भे आयाति तस्मात्कालादारभ्य एव संस्काराः आरभ्यन्ते मृत्युपर्यन्तं मानवः संस्कारूपी अङ्गारिकायामेव भवति तेन दुष्टसंस्काराः दुर्गुणाश्च व्यपगच्छन्ति सुसंस्काराश्चागच्छन्ति। स एव संस्कारः। आचार्य-चरकेन लिखितं संस्कारोहि गुणान्तराधानमुच्यते अनया दृष्ट्या मानवस्य नवनिर्माणं भवितुं शक्नोति।

यदा मानवस्य जन्म जायते तदा सः द्विधा समन्वितसंस्कारेण संश्लिष्टः भवति। प्रथमं तु जन्मजन्मान्तरेभ्यः विविधैः संस्काराः, द्वितीयं यस्य मातापित्रोः कुक्षि, वंशे वा जन्म अलभत तेषां वंशपरम्परया प्राप्ताः। ते उत्तमाः अपि भवितुं शक्नुवन्ति दुष्टाश्चापि किन्तु संस्कारेभ्यः मानवस्य नवनिर्माणं सम्यक्तया कर्त्तुं शक्नुमः। एतेभ्यः संस्कारेभ्यः

मातृपितृभ्यः प्राप्ताः, जन्मजन्मान्तरेभ्यः संचिताः दुष्टसंस्काराः निर्बीजं भवितुं शक्नुवन्ति एषा योजना संस्कारेभ्यः पूर्णतया पूर्णा भवति।

**शोधोद्देश्यानि**

- ❖ पारंपरिकसंस्कारस्य महत्त्वविवेचनम्।
- ❖ कीदृशानि नामानि भवेयुः तेषां कीदृशः प्रभावः जनेषु भवति।
- ❖ भारतीयपरम्परायां किमर्थं नामकरण संस्कारः अन्यतमः।
- ❖ संस्कारस्य मनोवैज्ञानिकं महत्त्वं किमिति विश्लेषणम्।
- ❖ विविधशास्त्रेषु प्राप्तप्रमाणेभ्यः समीक्षणम्।

**शोधविधिः**

एतस्मिन् शोधाध्ययने वर्णनात्मकस्य विधेः अनुसन्धानस्य अङ्गत्वेन अङ्गीकारः कृतः।

मानवजीवने, जगति वा द्विधा योजनाः भवन्ति (1) भौतिकी योजना (2) आध्यात्मिकी च। भौतिकवादी विचारधारा या वर्तते तस्याधारेण मानवः विचारयति यत् रोटिका, वस्त्रम् आवासश्चैव जीवनस्य प्रमुखसाधनानि। किन्तु विचायन्तु यत् भौतिकसमस्यानां पूर्तिः सर्वकारः करोति यथा जलव्यवस्था नद्याः, वाण्याः, पुष्कराश्च, उत्तममार्गस्य निर्माणं, सेतोः निर्माणं, परिवाहनानां, लौहपथगामिन्याः,

विमानानाञ्च व्यवस्था संजाता किन्तु यदि एतासां सौविध्यानाम् उपयोगाय न कोपि उत्तम मानवः भवति तर्हि कः लाभः सम्पूर्णः अपि श्रमः व्यर्थमेव भवति अत एव न केवलं भौतिकमेव विचिन्त्य जीवनं चलति अतएव आध्यात्मिकविषयेपि चिन्तनमावश्यकम् अनयैव योजनया मानवस्य नवनिर्माणम् उत्तमरूपेण भविष्यति। आध्यात्मिक दृष्ट्या एताः योजनाः आधारभूतास्सन्ति यया, स्वीय संस्कृतेः लक्ष्योद्देश्यानां च विषये पूर्णावगाहनमभवत्।

चतुर्षु दिक्षु आधुनिकतायाः चाकचक्यं दृग्गोचरी भवति, तस्यां आधुनिकतायाम् अनुकुर्वन्नेव जनाः भौतिकसौविध्यानि, वैभवञ्च एकत्री कुर्वन्तः दृश्यन्ते किन्तु सौविध्यानां वर्धने मुख्यमुद्देश्यं विस्मृतवन्तः। अत एव अद्यत्वे दिनानुदिन मानवीचिन्तने, व्यवहारे, दर्शने, आहारे, व्यवहारे च अधमता आयाति, कुत्र वर्तते सः मानवः यः मानवी गुणसम्मानः **वसुधैव कुटुम्बकम्**[20],(मनु.) **मित्रस्य चक्षुषा समीक्षामहे**[21] (यजुः) भावनायाः आप्लावितः आसीत्। एतासाम् उत्तमोत्तमयोजनानां केन्द्रबिन्दुः संस्कारास्सन्ति। षोडशसंस्कारेषु एकः संस्कारः नामकरणम्।

[20] मनुस्मृतिः

[21] यजुर्वेदः

एतस्य संस्कारस्य बहु उपयोगिता वर्तते यथा जगति सम्पूर्ण अपि व्यवहारः नाम्ना एव भवति। विद्यमान वस्तूनां, प्राणिनां विषयकज्ञानं तु केवलं प्रत्ययात्मकमेव वर्तते यथा धेनोः विषये, चतुरङ्गविषये सम्पूर्णोऽपि ज्ञानं वर्त्तते किन्तु यदि संज्ञायाः ज्ञानं न भवति तर्हि व्यवहारः भवितुं न शक्नोति अत: प्रत्ययात्मक-ज्ञानेन सह व्यवहारात्मकं, क्रियात्मकं ज्ञानमपि आवश्यकं वर्तते। दार्शनिकदृष्ट्या वक्तुं शक्नुमः यत् वस्तुनः नाम्नः संज्ञायाश्च यदि ज्ञानं नास्ति तर्हि तज्ज्ञानं निर्विकल्पकं ज्ञानमस्ति। किन्तु नाम-संज्ञासहितं ज्ञानं सविकल्पकं ज्ञानमुच्यते। अतः तत्र लौकिकव्यवहाराः निर्विकल्पकज्ञानेन न सम्भवति तदर्थन्तु सविकल्पक ज्ञानमेव आवश्यकम्। सैव सविकल्पकज्ञानं 'नामकरणसंस्कारः" इति नाम्ना ज्ञायते। संस्कारस्यास्य तावती एवावश्यकता वर्तते यावती आवश्यकता अन्येषां संस्काराणां वर्तते। अत एव शतपथ ब्राह्मणे उक्तम् –

तस्मात् जातस्य पुत्रस्य नाम कुर्यात्[22]। 6/1/3/9

बृहदारण्यकोपनिषदि अत्युत्तममुक्तम्- मृत्योरनन्तरं मानवं कः न त्यजति? नाम नाम्ना एव मानवः जगति अनन्तकालं प्रसिद्धः भवति

[22] शतपथब्राह्मण

**लोकञ्च जयति। यत्रायं पुरुषो म्रियते किमेनं न जहातीति नामेत्यनन्तं वै. स तेन लोकं जयति[23]। (3/2/12)**

अमुमेव विषयं प्रतिपादयन् आचार्य बृहस्पतिः वीरमित्रोदय संस्कारप्रकाश पृ.241 उद्धृतम्-

**नामाखिलस्य व्यवहारहेतुः शुभाशुभवहं कर्मसु भाग्यहेतुः।**

**नाम्नैव कीर्त्तिं लभते मनुष्यस्ततः प्रशस्तं खलु नामकर्म [24]॥**

अतः नामकरणसंस्कारस्यापि महत्वं जगति अत्यधिकं वर्तते।

**संस्कारोऽयं कदा करणीयः**- शिशोः जन्मनः(11) एकादशे (101) एकशताधिकैकशते अथवा द्वितीयवर्षस्यारम्भे यस्मिन् दिवसे पुत्रस्य जन्म अभवत्।

**गोभिलगृहसूत्रेनप्रमाणीक्रियते – जननाद्दशरात्रे व्युष्टे शतरात्रे संवत्सरे वा नामधेय करणम्[25]" (प्र.2, कां.7)**

आचार्यगदाधरस्यापि कारिका प्रतिपादयति यत् - एकादशे द्वादशे वा मासे पूर्णेऽथवा परे। अष्टादशेऽहनि तथा वदव्येके मनीषिणः शतरात्रे व्यतीते वा पूर्णे संवत्सरेऽथवा । प्राय: 11 एकादशे एकशताधिक एकशते दिवसे एव परम्परेयमनुसृयते।

---

[23] बृहदारण्यकोपनिषद्

[24] वीरमित्रोदयः संस्कारप्रकाशः

[25] गोभिलगृहसूत्र

**नाम कीदृशं भवेत् –**

कथनेन केवलं शब्दमात्रमेव प्रतिभाति किन्तु न तथा नाम प्रभावस्तु अत्यधिकम्। शब्द: वाणी वा मनस: कर्मण: मध्येऽवतिष्ठते। उक्तम्- "यन्मनसा मनुते तत् वाचा वदति यद्वाचा वदति तत् कर्मणा करोति" अत: मनसा यत् चिन्तनं भवति, यत् वाण्या उच्यते तादृशमेव कर्म भवति। अतः सन्ततेः नाम तादृशं भवेत् येन सर्वदा उन्नतमार्गं प्रति गच्छेत। शब्दस्य सूक्ष्मप्रभावः भवति तं प्रभावं विचार्य नामकरणं करणीयम् ।

**नामकरणे के नियमाः अवधारणायाः तद् विषयेप्युक्तम्-**

नाम चास्मै दद्युः घोषवदाद्यन्तरन्तस्थमभिनिष्ठानान्तरं द्व्यक्षरं चतुरक्षरं वा द्व्यक्षरं प्रतिष्ठाकाश्चतुरक्षरं ब्रह्मवर्चसकामः युग्मानि त्वेव पुंसाम्। अयुजानि स्त्रीणाम्। **अभिवादनीयं च समीक्षेत तन्मातापितौ विद्यतामोपनयनात्**[26] (आश्वलायनगृह्यसूत्र 1/15/4.10) (पारस्करगृह्यसूत्र- 1/17/2.4) अर्थात् यदि पुत्रः तर्हि द्व्यक्षरचतुरक्षरं घोषसंज्ञकम् अन्तस्थवर्णः, अर्थात् पञ्चभ्यः वर्गेभ्य: तृतीय, चतुर्थ, पञ्च वर्ण: य र ल व एतेभ्यः एकः वर्ण नाम्नि अवश्यं भवेत्।

[26] आश्वलायनगृह्यसूत्र, पारस्करगृह्यसूत्र

प्रथमद्वितीयवर्णेभ्यः नामानि नस्युः किन्तु अयुक्तोयं यतोहि बहुनामृषीणा नामानि प्राप्यन्ते। अतः युग्मानित्वेव पुंसाम्, अयुग्मानिस्त्रीणां द्व्यक्षरं, चतुरक्षरं नाम बालकस्य त्रयक्षरं पच्चाक्षरञ्च नाम बालिकायाः भवेत्। नामकरणे अवधेयं यत् उच्चभावनां स्वीत्यैव नामकरणं भवेत् तेन शिशुरपि ज्ञास्यति यत् नामस्य उद्देश्यं पूरणीयमिति।

कीदृश नामानि न भवेयुः अत्रापि प्रमाणं प्राप्यते –

**नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम्।**
**न पक्ष्महिप्रेष्यनाम्नीं न च भीषणनामिकाम्**[27]॥ (मनु 3/19)

**सारांशः**

नामकरण संस्कारेण पुत्रपुत्र्याश्च नाम तथा भवेत् येन सः सर्वदा उन्नतपथं गच्छेत, नाम्ना तस्य जीवनस्य लक्ष्योद्देश्यानाञ्च स्मृतिः पूर्तिश्च भवेत्। नामानि द्विधा भवितुं शक्नुवन्ति

(1) सरलानि सुवाच्यानि द्वयक्षरचतुरक्षरं बालकस्य नाम भवेत् स पञ्चाक्षर सरलं सुवाच्यञ्च बालिकयाः।

(2) स्नेहाभिषिक्तः नाम, अथवा यस्मिन् नक्षत्रे गोत्रे वा उत्पन्नः तादृशं नाम अपि भवितुं शक्नोति **आश्वलायनगृह्यसूत्रे उक्तम्- अभिवादनीयं च**

---

27 मनुस्मृतिः

ISSN: 2277-2359

समीक्षेत तन्मातापितरौ विदध्याताम् उपनयनात्[28]। प्रेम्ण उपस्थापितस्य नाम्नः प्रयोग: उपनयनात् प्रागेव करणीय:।

**सन्दर्भग्रन्थसूची-**


1. सत्यार्थप्रकाश- महर्षिस्वामिदयानन्दसरस्वती, आर्ष साहित्य प्रचार ट्रस्ट, 427गली मन्दिर वाली, नई दिल्ली।
2. संस्कार भास्कर- स्वामी विद्यानन्द सरस्वती, रामलालकपूर ट्रस्ट सोनीपत हरयाणा
3. भारतीय संस्कृति- प्रीति प्रभा गोयल राजस्थानी ग्रन्थागार, सोजती गेट, जोधपुर, राजस्थानसंस्कारविधिः – महर्षिस्वामिदयानन्दसरस्वती, आर्ष साहित्य प्रचार ट्रस्ट,427गली मन्दिर वाली, नई दिल्ली।
4. संस्कृतं संस्कृतिः संस्काराश्च शशीप्रभा कुमार विद्यानिधि प्रकाशन दिल्ली
5. याज्ञवल्क्यस्मृति- आचार्य याज्ञवल्क्य भारतीय विद्या प्रकाशन नई दिल्ली
6. शतपथब्राह्मण- स्वामी सत्यप्रकाश सरस्वती सम्पादक, चौखम्बासंस्कृतसंस्थान, वाराणसी


[28] आश्वलायनगृह्यसूत्रे

 ISSN: 2277-2359

# गृहनिर्माणार्थम् आयादिवर्गानयनक्रमः

**डा. गणेशकृष्णभट्टः**
सहायकाचार्यः (अतिथिः)
केन्द्रीयसंस्कृविश्वविद्यालयः
गुरुवायूर्-परिसरः, तृश्शूर्, केरलम्
Ph.9481226114

**वन्दे सिन्धूरपूराभं पार्वतीनन्दनं सदा ।**

**चतुर्भुजं कृपासिन्धुं गणेशं वरदं मुदा ॥**

**कुञ्चिकापदानि**

योनिः, आयः, व्ययः, गुणनम्, भाजनम्, योजनम्, गेहः, ध्वजः, क्षेत्रफलम्, परिधिः, व्यासः, गुणनफलम्।

**सारांशः**

वयं जानीमः यत् आप्रपञ्चे गृहनिर्माणेच्छुकः प्रत्येकोऽपि जनः स्वाभीष्टं सम्प्रदायमनुसृत्यैव कर्मणि प्रवृत्तो भवतीति। भारते तावत् उत्तरात् दक्षिणम्, पूर्वात् पश्चिमम् इति यावत् नानाविधगृहाणि दृश्यन्ते। तत्र च नानाविधोपक्रमाः, निर्माणप्रकाराः(शैली), भिन्नविभिन्नवस्तुसंयोगवशात् निर्मिताः वर्तन्ते। तत्र सर्वत्र कारणीभूतं भवति वास्तुशास्त्रम्। तादृशे वातुशास्त्रे मुख्यतया गृहनिर्माणार्थम्

आयादीनां निर्णयम् अनिवार्यमित्युक्तम्। अतः तस्मिन् विषये प्रबन्धेऽस्मिन् नानाग्रन्थसहयोगेन यथाशक्ति यथामति विस्तृतरूपेण प्रपञ्चयामि।

**उपोद्घातः**

विदितमेव विश्वेषां विदुषां यदस्माकं पूर्वजाः देवतुल्याः ऋषिमुनयः आश्रयार्थम् आवासार्थञ्च गृहादीनाम् आवश्यकताम् अनिवार्यताञ्च विज्ञाय विशिष्टान् लोकोपकारकान् काञ्चित् सिद्धान्तान् प्रतिपादितवन्तः। ते च विचाराः कालान्तरे वास्तुशास्त्रत्वेन निरूपिताः। तैरुक्ताः नानाविधसिद्धान्ताः विशेषविचाराश्च वास्तुशास्त्रेऽन्तर्भाविताः। वास्तुशास्त्रं तु ज्योतिषशास्त्रान्तर्भूतं विद्यते इति विदितमेवोऽयं विचारः। ज्योतिषे विद्यमानेषु त्रिषु स्कन्धेषु अन्यतमे संहितास्कन्धे वास्तुविषयो विस्तृतरूपेण निरूपितो वर्तते। वास्तुशास्त्रे गृहनिर्माणयोग्यभुवः चयनादारभ्य गृहनिर्माण-गृहप्रवेशपर्यन्तं विविधा आयामाः, नियमाः, उपायाः, उपक्रमाः, सिद्धान्ताः, निर्देशाश्च समावेशिताः।

**विषयप्रस्तुतिः**

तत्रादौ गृहनिर्माणे अतिप्रधानभूतः विषयः भवति योनिनिर्णयः। यदि अस्य निर्णयः न क्रियते तर्हि गृहं चिरं न तिष्ठेदथवा यजमानस्य

 ISSN: 2277-2359

तस्मिन् गृहे वासः अतिदुष्करः स्यात्। तस्मादिदानीं तस्मिन् विषये किञ्चिदवलोकयामः।

**गृहनिर्माणकाले योनिनिर्णयः –**

गृहनिर्माणे योनिः प्रधानस्थानं भजते । तर्हि योन्यदीनां ज्ञानं कथं भवति इति चेत् वदति – **अथ वक्ष्यामि गेहादेर्नाहं तद्दीर्घविस्तरान्**[29] इति। बहुप्रकारकगृहाणां बहुविधदीर्घविस्तारादिकं भवत्येव। तस्मात् दीर्घविस्तारसहितं नाहादिप्रयोजकाः भवन्ति ध्वजादियोनयः। ध्वज-सिंह-वृष-हस्तीति चतस्रः शुभयोनयः। ध्वजादियोनयः महादिग्देवताश्च भवन्ति। यथा पूर्वदिशायाः ध्वजः, दक्षिणदिशि सिंहः, पश्चिमस्यां वृषः तथा उत्तरस्यां गजः इति। ध्वजः इत्यस्य गरुड इति, हस्ती इत्यस्य गज इति च नामान्तरम् । विदिग्देवतायोनयश्च – **विदिङ्नाथास्तु धूमः श्वा खरो ध्वाङ्क्ष इति स्मृताः** इति प्रोक्तम्। तस्मात् आग्नेयदिशि धूमः, नैर्ऋत्यां दिशि श्वा, तथा वायव्ये खरः, ईशान्ये ध्वाङ्क्षः इति ज्ञातव्यम्। अत्र ध्वजादयः शुभयोनयश्चेत् धूमाद्याः चतस्रः योनयः अशुभाः वर्तन्ते।

---

[29] वा.वि. 8/21

परं ध्वजादियोनीनां संख्यां निर्दिशति आचार्यः – **ध्वजः स्यादेकसंख्योक्ता तथा द्वे धूम उच्यते**[30] इति। अत्र श्लोकद्वये एकसंख्या चेत् ध्वजः, द्वयं चेत् धूमः, त्रये सति सिंहः, चत्वारि चेत् श्वानः, पञ्चसंख्यास्तर्हि वृषः, षड्संख्याश्चेत् खरः, सप्तसंख्या चेत् गजः, अष्टौ चेत् ध्वाङ्क्षः इति च प्रोक्तम्। एताः योनयः गृहादिवास्तुनिर्णयसन्दर्भे पूर्वादिदिक्षु विदिक्षु च ज्ञातव्यम्। गृहाणाम् आय-तिथि-वारादीन् साधयितुमादौ पर्यन्तमानस्यानयनप्रकारं कथयति – **इष्टदीर्घं तु यद् द्विघ्नं तद्रामैकांशसंयुतम्। इष्टयोनैर्गुणेकांशयुतं पर्यन्तमुच्यते** ॥[31] इति। चिन्तितभूमिवशात् कल्पितं यदभीष्टं गृहस्य दैर्घ्यं तं द्विगुणीकृत्य प्राप्तां संख्यां तृतीयांशे, अर्थात् दिगनुसारं ज्ञाते योन्यंशे योजयेत्। प्रकारेणानेन ज्ञातफलवशात् तस्य तस्य गृहस्यापि ज्ञातं भवति। अत्र प्राप्तसंख्यानुसारं पूर्वोक्तयोनिनिर्णयः साध्यते। इत्थं प्राप्तादस्मात् प्रर्यन्तमानात् आयादीनां साधनं तु – **तदष्टगुणितं कृत्वा रविभिस्तिथिभिस्तथा** इत्यादिसार्धश्लोकद्वयेन प्रोक्तम्। पूर्वोक्तविधिना साधितं गृहस्य पूर्णं प्रमाणम् अष्टभिः सङ्गुण्यते चेत् या लब्धिः प्राप्यते तां त्रिभिः सङ्गुण्य

---

[30] वा.वि. 8/23-24

[31] वा.वि. 8/25

क्रमशः द्वादश-पञ्चदश-सप्तविंशति-सप्तभिः भाजयेत्। शिष्टं शेषः क्रमशः आय-तिथि-नक्षत्र-वारः इति ज्ञातव्यम्। शुक्लप्रतिपत्तः आरभ्य तिथिः ज्ञातव्या। पुनश्च तिथिनक्षत्रयोः परं यः शेषः शिष्यते, अङ्गुलात्मकेन वा तं सार्धद्वयेन सङ्गुणिते सति प्राप्ताः अतीतनातडिकाः भवन्ति। तथा सप्तविंशतिभिः गुणिते या लब्धिः वयः भवति। तस्मात् गृहस्य बाल-कुमार-युवा-वार्धक्य-मरणान्ताः अवस्थाः ज्ञायन्ते। व्ययस्य योनेश्चानयनप्रक्रियमाह – **त्रिगुणीकृत्य पर्यन्तं शक्रैश्च वसुभिर्हते। शेषस्तु व्यययोनी च भवतश्च यथाक्रमम्॥** इति। चिन्तितगृहपरिधिं त्रिभिः गुणित्वा चतुर्दशैः भाजिचे सति शेषः यः वर्तते सः व्ययः। एवं परिधिं त्रिभिः गुणित्वा अष्टभिः भक्ते सति शेषः योनिरित्यर्थः। तथैव – **विष्टिर्मरणयोगो वा मा भून्मनुजधामसु**, इत्यत्र गृहाणाम् आनीयमानेषु तिथ्यादिषु विष्टिनामकान् तिथिविशेषांशान् वर्जयेत्, गृहस्य वयस्तु मरणाख्यं वर्जयेदिति च कथितम्। विष्टिस्तु शुक्लपक्षस्य अष्टम्याः पूर्णिमायाः च पूर्वार्धम्, चतुर्थ्याः एकादश्याः च उत्तरार्धम्, तथा कृष्णपक्षस्य तृतीयायाः च दशम्याः च परार्धम्, सप्तमी-चतुर्दश्योः पूर्वार्धं च भवति इति ज्ञातमेव। एवं गृहपर्यन्तमानम् अष्टभिः गुणयित्वा सप्तविंशत्या विभजिते लब्धिः पञ्चचेत् मरणयोगः, चत्वारि चेत् वार्धकः,

त्रीणि सति यौवनः, लब्धिः द्वयं चेत् कौमारः, तथैकं तर्हि बाल्ययोगः इति ग्रन्थान्तरादवगन्तव्यम्। विष्ट्यादियुक्तेषु गृहेषु वसतां फलं निरूपयति ग्रन्थकारः – **मृतियोग घामस्थी द्रुतं याति यमालयम्** इत्यादिश्लोकद्वये। अर्थात् विष्टि-मरणयोगादिषु, तत्रादौ मरणयोगे वास्तुस्थापनम्, खननम्, प्रतिष्ठादिकं कुर्वन्ति चेत् तदा तत् गृहं यमालयसदृशं सम्भवति। विष्टियोगे निवासकरणे सर्वनाशः स्यादिति हेतोः द्वावपि योगौ वर्ज्यौ। तथैव वार्धकयोगः, शुक्लकृष्णपक्षयोः चतुर्थी – नवमी - चतुर्दशीतिथयः निन्दिताः। तस्मात् एतत्सर्वं विचार्य एव गृहवास्तुस्थापनादिकार्याणि समाचरेदिति शास्त्रकारणं सर्वेषां मतम्।

मनुष्यालयचन्द्रिकायां तावत् योनिविचारं प्रस्तौति – **यानाङ्गादिषु केतुरिव विहितः सर्वत्र शस्तो ह्ययम्**[32] इत्यादिना। अत्र श्लोके यानसाधनादीनां योनिः कथितः। अर्थात् प्रयाणसाधनभूतानां रथ-प्लव-वाहनानां कृते ध्वजयोनिर्विहिता। एवं पर्यङ्कादिषु शयनसाधनेषु गजयोनिः प्रशस्ताः। पीठ-आसन-आसन्द-उत्पीटिकानां कृते

[32] म.च. 3/22

सिंहयोनिः, तथा कूप-तटाक-पञ्जर-पात्रादिषु वृषभयोनिः अथवा ध्वजयोनिः, पुनः अश्वत्थ-नाग-मल्लिकादिकुट्टिमाविधौ ध्वजयोनिः च शुभा, प्रशस्ता इति कथितम्। अत्र मानपात्रादिषु, कूप-तडागादिषु तथा अङ्गण-गर्भगृहेषु च योनिगणना तेषाम् अन्तस्थादेव कार्यम्। चतुरश्राकारचतुश्शालानां कृते कुत्रचित् उत्तरव्यासमध्यं योनिगणनायां स्वीकार्यमिति उक्तम्। तस्मादत्र एतदवगन्तव्यं यत् वास्तुसम्बद्धस्य प्रत्येकस्यापि वस्तुनः कृते निर्दिष्टः आयः योनिः वा अपेक्षितमेव। तादृशयोनिनिश्चयार्थं परिधिप्रमाणमनिवार्यम्। अधुना योन्यानयनविधानं निरूप्यते – **इष्टातान वितानमाननिचये त्रिघ्नेऽष्टभिर्भाजिते, शेषो योनिरिह व्ययो मुनियुजाथायोऽष्टनिघ्नेरुणैः। ऋक्षैर्ऋक्षभवाप्तिरत्र तु वयो ज्ञेयं तिथिस्त्रिंशता, वारो भूमिधरैर्निधिप्रगुणिते धर्माहृते वा व्ययः॥** इति। अस्माभिरभीप्सितां परिधिं त्रिगुणितं कृत्वा अष्टभिः भाजिते सति यः शेषः सा योनिसंख्या। परिधिः त्रिगुणितं कृत्वा चतुर्दशभिः भाजिते सति शेषः व्ययः। पुनः परिधिम् अष्टभिः सङ्गुण्य द्वादशभिः विभक्ते चेत् शिष्टः शेषः आयः। तथा परिधिम् अष्टभिः सङ्गुण्य सप्तविंशतिभिर्भक्तं चेत् शेषः नक्षत्रसंख्या भवति। पुनरेकवारं परिधिमष्टभिः सङ्गुण्य सप्तविंशतिभिर्भक्ते सति लब्धिः वयः। एवं परिधिम् अष्टभिर्गुणयित्वा

त्रिंशद्भिर्विभक्तं चेत् शेषः तिथिः। परिधिम् अष्टभिः गुणयित्वा सप्तभिः भक्ते सति शेषः वासरः। तथैव परिधिं नवभिः सङ्गुण्य दशभिर्भाजिते सति अवशिष्टः व्ययः इत्युक्तम्। सम्प्रति योनयः प्रोच्यते – **ध्वजधूमसिंहकुक्कुरवृषखरगजवायसाः क्रमेण स्युः**[33] इत्यादि श्लोके। ध्वजधूमसिंहकक्कुरवृषखरगजवायस चेति अष्टौ योनयः प्रोक्ताः। एतेषां क्रमात् पूर्वादितः समारभ्य दिशाः भवन्ति। प्रथम-तृतीय-पञ्च-सप्ताः विषमसंख्यकाः योनयः सम्पत्कारकाः। द्वितीय-चतुर्थ-षष्ठ-अष्टमाः समसंख्यकाः योनयः विपत्कारकाः। एतासां योनीनां फलमुच्यते – ध्वजयोनिरभीष्टफलदायकम्, सात्विकगुणयुक्तम्, बृहस्पतिः, द्विजः च वर्तते। एषा योनिः पूर्वदिशायां प्रशस्ता चेदपि वास्तुविषये सर्वदिक्षु हितकारका वर्तते। **सिंहो दक्षिणसंस्थितः क्षितिसुतो लक्ष्मीप्रदस्तामसो** इत्यस्मिन् श्लोके सिंहयोनिः दक्षिणदिशि प्रशस्तं वर्तते। तथा सम्पत्प्रदः, क्षितिसुतः, तामसगुणयुतः, क्षत्रियश्च वर्तते। गजयोनेः स्थानम् उत्तरदिशि भवति। गजयोनिः वैश्यः, शुभकरः, बुधः, राजसगुणयुक्तः च वर्तते। एवं वृषभयोनिः शूद्रः, शनिः, धान्यप्रदः, तामसगुणयुक्तः, पश्चिमदिशि च भवति। विदिक्षु निगदिताः योनयः

---

[33] म.च. 3/25

तास्वेव दिक्षु निन्दिताः भूत्वा प्राधान्यहीनाः सञ्जायन्ते। तस्मात् धूमयोनौ उद्वेगः, कुक्कुरयोनौ कलहः, खरयोनौ चपलता, काकयोनौ कुलहानिः च भवतीति प्रोक्तम्। ईदृशफलयुक्तत्वात् एते सर्वे सदा दूषिताः एव इति निरूपितम्। स्पष्टार्थं योनीनां दिक्स्थानग्रहगुणवर्णफलानि प्रोक्तानि। कोष्टके -

| क्र.सं | योनिः | दिक्स्थानम् | ग्रहः | गुणः | वर्णः | फलम् |
|---|---|---|---|---|---|---|
| 1 | ध्वजः | पूर्वा | गुरुः | सात्विकः | द्विजः | अभीष्टफलदायकः |
| 2 | सिंहः | दक्षिणा | कुजः | तामसः | क्षत्रियः | सम्पत्प्रदः |
| 3 | वृषभः | पश्चिमा | शनिः | तामसः | शूद्रः | धान्यप्रदः |
| 4 | गजः | उत्तरा | बुधः | राजसः | वैश्यः | शुभप्रदः |

शुभफलदायकानां योनीनामुपयोगः कथितः नीलकण्ठन् वर्येण यथा – **प्राच्यां केतुर्विधेयः स तु भवनविधानेषु सर्वत्र शस्तः**[34] इति। पूर्वदिशि गृहनिर्माणार्थं ध्वजयोनिः प्रशस्ता भवति। एवमेव एषा ध्वजयोनिः पूर्वदिशायां प्रशस्ता चेदपि गृहनिर्माणविधाने तावत्

[34] म.च. 3/29

सर्वदिशि योग्या एव। दक्षिणदिक्स्थगृहं प्रति सिंहयोनिः योग्या। पूर्वोक्तत्वात् ध्वजयोनिरपि शुभदा एव। उत्तरदिशायाः गृहं प्रति गजयोनिः इत्युक्तम्। तथैव ध्वजयोनिः सिंहयोनिः च स्वीकर्तुं शक्यते। पश्चिमदिशि निर्मीयमाणगृहस्य कृते वृषभयोनिः श्रेष्ठा। केतुरर्थात् ध्वजसिंहगजयोनयः स्वीकारार्हाः। कोणालयेषु तत्तद्दिशि प्रोक्ताः योनयः एव स्वीकार्याः। अत्र एतदप्यवगन्तव्यं यत् चतुश्शालां मनसि निधाय दिगनुसारं एताः योनयः प्रोक्ताः। तस्मात् पूर्वदिग्गृहम् इत्यस्य पूर्वस्यां दिशि स्थितं पश्चिमाभिमुखम् इति ग्राह्यम्। तथैव दक्षिणगृहमित्यस्य उत्तराभिमुखम्, पश्चिमगृहमित्यस्य पूर्वाभिमुखमिति, एवम् उत्तरगृहमित्यस्य दक्षिणाभिमुखं गृहम् इत्यर्थः। परन्तु एष एव नियमः एकशालायामप्यनुवर्तते। योनीनां प्राधान्यं तावत् – योनिः **प्राणा एव धाम्नां यदस्मात्** इति। गृहाणां कृते योनिरेव प्राणभूतं वर्तते। तस्मात् योनिषु गृहार्थं योग्या एव योनिः स्वीकर्तव्या। यतोहि गृहस्य कृते मृत्युः न आगन्तव्यमेव। यदि योग्यां योनिं न स्वीक्रियते तर्हि मृत्योः स्वागतकरणेन सह सकलसङ्कष्टानां प्राप्तिः भवति। तस्मादत्र ज्ञातव्यं यत् योनिं विना निर्मितं गृहं प्राणहीनशरीरमिव। तावत् प्राधान्यं वर्तते योन्याः। अतः योन्यनुगुणं गृहं निर्माय सुखशान्त्यादिकं प्राप्नुमः इति।

तथैव व्ययस्यापेक्षया आदायः यथा अधिकं भवेत् तथा अवलोकनीयम्। यद्येवं न क्रियते तर्हि आपदः समायान्ति। नक्षत्रादीनां शुभाशुभत्वं शास्त्रज्ञैः प्राप्तव्यम्। बाल्यादि आयुःप्रमाणं तावत् – **बालत्वं कौमारं यौवनमथवार्धकं च निधनं च** इति श्लोके प्रोक्तम्। अर्थात् बाल्यकौमार्ययौवनवार्धकनिधनानि पञ्चायुःप्रमाणानि। एषु पञ्चायुप्रमाणेषु अन्तिमं तु वर्ज्यमेव। अवशिष्टानि चत्वारि प्रमाणानि वास्तुकार्ये श्रेष्ठानि भवन्ति। तत्र च यौवनप्रमाणम् अति श्रेष्ठम्।

योनिनिर्णये पक्षान्तरविधिरपि वर्तते। तच्च – **सामान्यं परिणाहतः सुविहिता योन्यादयो दीर्घतो**[35] इति श्लोके उक्तं दृश्यते। अर्थात् सामान्यरूपेण परिधितः योन्यादीनां निर्णयः प्रशस्तः। तथा चिन्तितगृहस्य दीर्घविस्तारयोः, पादमान-चरण-अधिष्ठानानाम् औन्नत्येन एवं विस्तारगुणितेन दीर्घेन च प्रत्येकरूपेण उक्ताः योन्यादयः गृहविधौ शुभाः भवन्ति चेत् पक्षान्तरं प्रोक्तं चेदपि तत् प्रशस्तं भवति इति। प्रायः अधिकाधिकाः गृहनिर्मातारः केवलगर्भगृहस्य कृते योन्यादिकं कुर्वन्ति। परन्तु तस्य गर्भगृहस्य परितः भविष्यमाणप्रकोष्ठानां, भित्तेः,

[35] म.च. 3/34

पञ्चाङ्गस्य कृते च आयादीनां निर्णयं न कुर्वन्ति। स्वेच्छानुगुणं आचरन्ति। एतत्तु असमीचीनम्। गृहस्य प्रत्येकस्यापि अङ्गस्य कृते योन्यादीन् निश्चित्य निर्माणम् अत्यन्तसूक्तं क्षेमकरं च भवति। तदेवात्र सूक्ष्मरूपेणोक्तमित्यवगन्तव्यम्। पुनः सर्वागारे प्रधानोत्तरपरिधिवशात् दीर्घविस्तारतुङ्गस्तम्भाधिष्ठानगर्भालमिति विधयो द्वारबिम्बादयोऽपि। आरूढाद्युत्तरं च द्वितलविधिसमस्ताङ्गभेदा विकल्पे। **नोक्तैरंशैश्च कार्या यदि निकटगता योनिभेदाश्च योज्याः** इत्यत्र योनिनिर्णयः कथितः। सर्वेषु गृहेषु दीर्घः, विस्तारः, औन्नत्यम्, स्तम्भः, अधिष्ठानम्, गर्भगृहः एवमित्यादयः, द्वारबिम्बकवाटादयः आरूढोत्तरं तथा उत्तराः, इत्यादि सर्वेऽपि अङ्गाः इत्येतेषां सर्वेषामपि प्रमाणं प्रधानोत्तरपरिधेः आधारेणैव निश्चेतव्यम्। इत्थमत्रापि गृहस्य सर्वावयवेभ्यः एकविधेः योनेरैव उपयोगः करणीयः इति निरूपितं दृश्यते। **गेहे क्षेत्रफलं वितानिहतायामं विदुः स्वेष्टदिक्** इति श्लोके क्षेत्रफलादि विचाराः प्रोक्ताः। दैर्घ्यं विस्तारेण गुणितं चेत् लब्धिरेव क्षेत्रफलं भवति। अस्माभिः वाञ्छितस्य दिग्गृहस्य योनिः दैर्घ्यविस्तारयोः गणनया प्राप्यते इति कारणात् आदौ गृहस्य दैर्घ्यविस्तारयोः निश्चयः करणीयः। तदनन्तरं परिधिविधानतः व्ययादीनां कल्पनं कार्यम्। अर्थादत्र क्षेत्रफलात्

योन्यन्वेषणविधानं प्रोक्तम्। पूर्वं योन्यन्वेषणार्थं परिधिगणनं स्वाकृतम्। साधितक्षेत्रफलम् अष्ठभिः विभज्यते तर्हि या शेषसंख्या सा योनिसंख्या भवति। अग्रे च व्ययस्य चातुर्विध्यं प्रोच्यते – **पूर्वं त्रिघ्नं चतुर्दशाप्तपरिधेः सामान्यमुक्तो व्ययो**[36] इति। पूर्वं तु परिधिं त्रिभिः सङ्गुण्य चतुर्दशैः भाजिते सति यः शेषः सः व्ययः इति प्रथमं विधानमुक्तम्। द्वितीयं तु परिधिं नवभिः गुणयित्वा अष्टभिः भाजिते सति शिष्टः शेषः एव। पुनः परिधिं नवभिरेव गुणयित्वा दशभिः भक्तं चेत् शेषः व्ययः इति तृतीयं विधानम्। पूर्वोक्तक्रमेण सिद्धां नक्षत्रसंख्याम् अष्टभिर्भाजितं चेत् प्राप्तः शेषः व्ययः इति चतुर्थः प्रकारः। अत्रोक्तेषु यं कमपि एकं विधानं स्वाकृत्य व्ययं साध्यते चेदपि आयात् या आदायात् न्यूनमेव विद्यात्। यदि विपरीतं सञ्जायते तर्हि पुत्रनाशः धनादिनाशः च सम्भवति। आदायसाधनं तु परिधिं भागत्रयं कृत्वा तत्रैकमंशं संयोज्य द्वयं तत्र गुणयित्वा अष्टभिर्भाजिते सति शेषः आदायः। एवं परिधिं सप्तविंशतिभिः सङ्गुण्य विंशैर्भाजिते शेषः वयः भवति। अत्र भागलब्ध्या बालत्वादिविचारः ज्ञातव्यः। शेषतः तु सम्पूर्णवयः ज्ञातव्यः। बालत्वादिषु तारुण्यवयः शुभदः वर्तते। आदायसाधनं पूर्वमपि

---

[36] म.च. 3/37

एकवारमुक्तमेव। अत्रोक्तः अन्यः प्रकारः। तिथ्यादिसाधनमुच्यते – परिधिं नवभिर्गुणयित्वा अथवा साक्षात् परिधिमेव त्रिंशता भक्ते सति शेषः पक्षद्वये तिथयः भवन्ति। एवं परिधिं त्रयेण नवभिर्वा सङ्गुण्य चतुर्भिर्भक्ते सति शेषसंख्या ब्राह्मणादिवर्णान् सूचयति। तथैव परिधिं चतुर्भिः अष्टभिर्वा सङ्गुण्य द्वादशभिर्भक्ते सति शिष्टा शेषसंख्या मेषादिराशिसंख्यां सूचयति। एवमेव परिधिं सप्तभिर्भक्ते सति अथवा परिधिं त्रिभिः गुणयित्वा सप्तभिर्भाजितं चेत् शेषसंख्या वाराणां भवति। पुनः परिधिं द्वयेन त्रिभिर्वा गुणयित्वा षोडशभिः विभाजितं चेत् शिष्टः शेषः ध्रुवादीन् सूचयति। ध्रुवादयः तावत् क्षेत्रफलसंख्यां प्रति व्ययस्य संख्यां संयोज्य षोडशभिः भाजिते सति शिष्टा संख्या ध्रुवसंख्या। ध्रुवाः षोडशसंख्यकाः भवन्ति। यथा ध्रुव-धान्य-जय-विनाश-खर-कान्त-मनःप्रसाद-सुमुखत्व- सौम्यत्व -असौम्यत्व-विरोध-वित्तोद्भव-क्षय-आक्रन्द-वृद्धिः चेति। उक्तं च क्षेत्रफले - **व्ययुक्ते नृपभक्ते वा ध्रुवादयः शिष्टाः। ध्रुवधान्यजयविनाशाः खरकान्तमनःप्रसाद सुमुखत्वम्॥ सौम्यतासौम्यत्वे विरोधवित्तोद्भवक्षयाक्रन्दाः। वृद्धिजयौ च क्रमशः संज्ञातुल्यं फलं भवेदेषाम्॥** इति।

ISSN: 2277-2359

इत्थं ग्रन्थद्वयेऽपि योनिविचारः निरूपितः। अष्टौ योनयः उक्ताः। तत्र च चत्वारः शुभाः चत्वारः अशुभाः। ग्रन्थद्वयेऽपि योनीनां दिशाः समानाः एव। परन्तु वास्तुविद्यायां योन्यादीनां साधनं क्रियते तथा मनुष्यालयचन्द्रिकायां नास्त्येव। वास्तुविद्यायां पर्यन्तमानं यथा – साधयित्वा ततः योनि-आय-व्ययादीनां साधनमुक्तम्। मनुष्यालयचन्द्रिकायां साक्षात् परिधितः एव साधसक्रमः प्रोक्तः। पर्यन्तमानं परिधिरिति द्वयमपि समानार्थकावेव। परन्तु इतः परं यः गुणन-भाजन-योजनक्रमः कथितः सः भिन्नतया दृश्यते। तथापि साधने लक्ष्यं तावत् योनि-आय-व्ययादयः एव। वास्तुविद्यायां नक्षत्रस्य गतनाडिका आनयनं कथितम्। मनुष्यालये नास्त्येव। तथैव वास्तुविद्यायां वास्तुस्थापनादीनां कालनिर्णयः निरूपितः। तदपि मनुष्यालयचन्द्रिकायां नास्ति।

विशेषतया वक्तव्यं चेत् मनुष्यालयचन्द्रिकायां एषः विचारः बहुविस्तरेण निरूपितः। यतोहि योन्यादयः न केवलं गर्भगृहस्य निर्णये, अपि तु गृहस्य प्रत्येकस्यापि अङ्गस्य निर्माणे अपि योन्यादयः अवलोकनीयाः। तच्च शुभदायकं भवतीत्युक्तम्। एवं षोडशध्रुवाः,

आयव्ययाः, ध्वजादियोनीनां तत्तत्स्थाने फलानि इति सर्वेऽपि विचाराः पक्षान्तरेण सहिताः निरूपिताः सन्दृश्यन्ते। ग्रन्थान्तरेषु अपि विषयेऽस्मिन् विचारः प्रस्तुतः दृश्यते।

यथा समराङ्गणसूत्रधारे आयानयनप्रकारस्तु –

**दैर्घ्यं हन्यात् पृथुत्वेन हरेद्भागं तथोऽष्टभिः।**

**यच्छेषमायं तं विद्याच्छास्त्रदृष्टं ध्वजादिकम्॥**

**ध्वजो धूमोऽथ सिंहश्च श्वावृषः खरकुञ्जरौ।**

**ध्वाङ्क्षश्चेति उद्दिष्टः प्राच्याद्यासु प्रदक्षिणम्॥**[37]

तेषां फलञ्च कथ्यते – वृषसिंहगजध्वजश्चेति आयाः प्रासादपुरभवनादिषु मङ्गलदाः भवन्ति। ध्वजे अर्थलाभः, धूमे सन्तापः, सिंहे भोगः, शुनके कलिः, वृषे धनधान्याभिवृद्धिः, खरे स्त्रीदूषणम्, गजे सर्वमङ्गलम्, ध्वाङ्क्षे मरणमिति। विप्रादीनां प्रशस्ताः आयाः –

**कल्याणं कुरुते सिंहो ब्राह्मणस्य विशेषतः।**

**क्षत्रियस्य गजः शस्तो वृषभः शस्यते विशः॥**

**शूद्रस्य ध्वज एवैकः शस्यतेऽर्थप्रदः सदा।**[38]

---

37 स.सू. 16/17,18

38 स.सू. 16/23,24

मयमते वसतिविन्यासकाले आयादयः सर्वेऽपि विचाराः गृहस्वामिनः, तस्य भूमेश्च अनुकूलकराः एव स्युः निगदितम्। उक्तं च-

**आयव्ययर्क्षयोन्यायुभिरथ तिथिभिश्च वारैश्च।**

**यजमानवस्तुनामजन्मर्क्षेणाविरोधिकं यत्तु ॥**[39]

योनिशुभाशुभत्वे च – **ध्वजधूमसिंहश्वावृषखरगजकाकाश्च योनिगणाः। अष्टौ योनया उदिता ध्वजहरिवृषहस्तिनः शुभदाः ॥**[40]

इत्थं प्रबन्धेऽस्मिन् प्रसिद्धाचार्याणां मतभेदप्रदर्शनपुरस्सरं तेषामभिप्रायः अल्पप्रमाणे मया सङ्गृहीताः। प्रायः रचितग्रन्थाः सर्वेऽपि आचार्याः विषयमिममधिकृत्य स्वाभिप्रायं प्रकटितवन्तः एव। तेनैव विषयस्यास्य महत्त्वं प्राधान्यञ्च वयं ज्ञातुं शक्नुमः। तस्मात् वयमपि अस्माकं गृहस्य दीर्घायुष्यम्, गृहे सुदीर्घसुजीवनयापनयोगादिसिद्ध्यर्थं आचार्यैरुक्तविचारान् सङ्गृह्य पालयन्तः जीवने यशमनुभवामः इति कथयन् प्रबन्धमिदमत्रैवोपसंहरामि।

---

[39] म.म. 9/19

[40] म.म. 9/21,22

# सन्दर्भग्रन्थसूची


| क्र.सं | ग्रन्थनाम | कर्ता/सम्पादकः | मुद्रणम् | वर्षम् |
|---|---|---|---|---|
| 1 | मनुष्यालयचन्द्रिका | श्रीकृष्ण जुगन् | चौखाम्बा कृष्णदास अकादमी | २००६ |
| 2 | मनुष्यालयचन्द्रिका (कन्नड) | सिद्धमूले शङ्करनरायणभट्टः | कृष्णभट्ट संस्मरणवेदिके, सुल्या, कर्नाटक | २००३ |
| 3 | मयमतम् – प्रथमः भागः | शैलजपाण्डेयः | चौखाम्बा सुरभारती संस्कृत प्रकाशनम् | २००७ |
| 4 | मयमतम् – द्वितीयः भागः | शैलजपण्डेयः | चौखाम्बा सुरभारती संस्कृत प्रकाशनम् | २००७ |
| 5 | मयमतम् – प्रथमः भागः | श्रीकृष्ण जुगन् | चौखाम्बा संस्कृत सीरीज | २००८ |
| 6 | मयमतम् – द्वितीयः भागः | श्रीकृष्ण जुगन् | चौखाम्बा संस्कृत सीरीज | २००८ |
| 7 | वास्तुविद्या | श्रीकृष्ण जुगन् | चौखम्बा संस्कृत सिरीज् | २००९ |

# प्राचीनलौकिकसंस्कृतसाहित्ये राष्ट्रियभावना

**डा. सोमनाथसेनापतिः**

सहायकाचार्यः (अतिथिः)

केन्द्रीयसंस्कृविश्वविद्यालयः

गुरुवायूर्-परिसरः, तृश्शूर्, केरलम्

Mobile No – 7795266020

Email – senapatisomnath500@gmail.com

## प्रस्तावना

जानन्ति सर्वे संस्कृतज्ञाः यत् पृथिव्याः सृष्टिसमये अस्माकं धरणीमाता अखण्डा आसीत्। काले काले मानवैः वसुन्धरायाः अफ्रीका, यूरोपः, उत्तर अमरीका, दक्षिण अमरीका, अस्ट्रेलिया, अंटार्टिका इति सप्त महादेशाः तथा प्रशान्तमहासागरः, अट्लांटिकमहासागरः, हिन्दूमहासागरः, आर्कटिकमहासागरः, तथा दक्षिणमहासागरादिभिः विभागैः विभक्तः। एतेषु सप्तमहादेशेषु अगणितराष्ट्रस्य जन्म अभूत्। अस्मिन् आधुनिककाले किं नाम राष्ट्रम्, राष्ट्रनिर्माणे सर्वासां भाषाणां भाषाजनन्याः संस्कृतभाषायाः किम् अवदानम्? तथा च संस्कृतभाषायां विरचितेषु

 ISSN: 2277-2359

प्राचीनलौकिकसंस्कृतसाहित्यग्रन्थेषु राष्ट्रियभावना कथम् अस्ति, तस्मिन् विषये अस्माभिः चिन्तनीयम्। यदि श्रद्धया विपश्चिता राष्ट्रविषये चिन्त्यते तर्हि विश्वे राष्ट्रियभावना सुयोग्यस्थानं प्राप्स्यति। यतो हि सर्वे विद्वांसः जानन्ति यत् संस्कृतवाङ्मयः अफुरन्तरत्नभाण्डारः। सुतरां संस्कृतरत्नभण्डारात् रत्नस्य मूल्यनिर्धारणं हि सर्वेषां संस्कृतानुरागिणां प्रधानदायित्वम्। यदि एवं कथ्यते आधुनिकराजनीतिविज्ञाने राष्ट्रविषये विशदरूपेण चर्चा अस्ति, तर्हि संस्कृतसाहित्ये राष्ट्रियभावानायाः परिशीलनस्य का आवश्यकता चेत् भ्रमः भवेत्। कुतश्चित् संस्कृतवाङ्मयं विश्वस्य ज्ञाननिधिः। भारतस्य तु प्रतिष्ठा। यथा उच्यते मनीषिभिः – भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा। अतः विश्वकल्याणाय विश्वभाषाकल्याणाय च प्राचीनलौकिकसंस्कृसाहित्ये राष्ट्रियभावना कथम् आसीत् तस्मिन् विषये परिशीलनं हि अस्य शोधप्रबन्धस्य प्रधानोद्देश्यम्।

**शोधसारः**

राष्ट्रलक्षणम् - समग्रविश्वे सर्वे आबालवृद्धाः भिन्न-भिन्नभाषासु राष्ट्रम् इति पदेन सह अतिपरिचिताः। Kingdom, Dominion, Realm, Empire, District, Country, People, Nation,

Subjects[41]. आङ्ग्लानाम् इदमेव Nation पदं संस्कृतभाषायां जात्याद्यर्थेषु प्रयुक्तम्[42]।

संस्कृतभाषायां लिखितस्य राष्ट्रम् इति पदस्य व्युत्पत्तिं पश्यामः चेत्, तर्हि ज्ञातुं शक्यते यत् राज् धातुः ष्ट्रन् प्रत्ययः कृते सति राष्ट्रम् इति पदं निष्पद्यते। अर्थात् √राज् + ष्ट्रन् = राष्ट्रम्[43]।

एवमेव मनुस्मृतौ[44] अपि मनुवचनेन ज्ञायते यत् यदि कश्चन राजा तस्करं नियन्त्रयितुम् असमर्थो भवति एवञ्च स एव राजा प्रजाभ्यः राजस्वं स्वीकरोति चेत् तस्य राष्ट्रम् सम्पूर्णरूपेण नष्टं भवति। तस्माच्च राजा स्वयमपि स्वर्गच्युतः भवति।

**राजनीतिशास्त्रेषु राष्ट्रपर्यालोचनम्**

राजनीतिशास्त्रेष्वपि राष्ट्रपदम् एकम् अतीवमहत्त्वपूर्णपदम्। अस्य पदस्य यथायथरूपेण अर्थबोधनाय राजनीतिशास्त्रविद्भिः सर्वेषां

---

41. A Sanskrit English Dictenorypg 976

42. जातिः लोकः, जनपदः, प्रजा, वर्णः, जनता, देशः, विषयः, राष्ट्रः, देशजनः, देशलोकः, देशवासिनः, राष्ट्रवासिनः, तथा विशेषदेशजनता एतेषु अर्थेषु प्रयुक्तः। A Sanskrit English Dictenorypg 976.

43.सर्वधातुभ्यः ष्ट्रन्। व्या.सि. कौ. 4.158

44.अशासंस्तस्करान् यस्तु बलिं गृह्णाति पार्थिवः।
तस्य प्रक्षुभ्यते राष्ट्रं स्वर्गाच्च परिहीयते।। (मनु.स्मृ. 6.254)

 ISSN: 2277-2359

चरणानां विचारविमर्शं कृतमासीत्। उदाहरणरूपेण आङ्ग्लभाषी राजनीतिशास्त्रविद् राष्ट्रम् इति पदस्य कृते (Nation) इति पदं प्रयुक्तवान्।

राजनीतिशास्त्रविदुषाम्[45] अनुमानं यत् इदं पदं मूलतः लेटिन्भाषायाः (Natus) इति पदात् विकसितम्। यस्यार्थः जातिः अथवा जन्म, यत्र तु प्रजातिः (Race) सम्बन्धिसमानता प्राप्यते। राष्ट्रियताविभिन्नेषु संस्कृतकोशग्रन्थेषु 'राष्ट्रियः' अथवा 'राष्ट्रीयः' इति पदस्य संकलनं प्राप्यते परं राष्ट्रियता किम् वा राष्ट्रीयता शब्दस्य प्रयोगः नैव प्राप्यते। एवमेव आङ्ग्लशब्दकोशे अपि नैव प्राप्यते परम् आङ्गलभाषायां पर्यायवाचिशब्दः (Nationallity) इति पदम् अतीव प्रसिद्धम्।

## राष्ट्रियभावना

समाजे तादृशः मानवः नैव प्राप्यते यस्य हृदये राष्ट्रियभावना नास्ति। अतः राष्ट्रभूमिः, जनसमूहः, संस्कृतिः, कला, सभ्यता,

[45]Etymologically, Nation and Nationality mean the samething. From They are both derived from the Latin word Natus. (Fundamentals of political science and organisation, chapter 2nd page no 44)

इतिहासः, धर्मः, राजनीतिः, जीवनदर्शनं प्रति मनुष्यानां मनसि राष्ट्रं प्रति नैसर्गिकगरिमा विद्यते, सैव राष्ट्रियभावना इति वक्तुं शक्यते। विश्वे सर्वे मानवाः अस्यां भावनायां लीनाः भूत्वा राष्ट्रहिताय आत्मोत्सर्गं समर्पयन्ति। यदि एकस्य राष्ट्रस्य संकटः दृश्यते, तर्हि तस्य राष्ट्रस्य आबालवृद्धः, नरनारी, सर्वे राष्ट्रवासिनः संकटमोचनाय यथाशक्तिः सामर्थ्यं प्रदर्शयन्ति। अर्थात् राष्ट्रस्य भौगलिकसीमासुरक्षां प्रति सद्भावना, राष्ट्रं प्रति सर्वाधिकप्रेमभावना, राष्ट्रस्य भौतिकः, आध्यात्मिकः, सांस्कृतिकसम्पदां सुरक्षाभावना, राष्ट्रविकासाय निष्ठा, राष्ट्रस्य यस्य कस्यपि क्षेत्रस्य अथवा विशेषजनसमूहस्य प्राकृतिकविपत्तिः स्वस्य विपत्तिः इति विचिन्त्य विपत्तिमोचनाय आत्मनिवेशभावना, राष्ट्रस्य गरिमाप्रतिष्ठापनाय उदारचेता, अन्यराष्ट्रं प्रति हीनभावपरित्यागः तथा प्रेमभावप्रकटनम्, अन्तराष्ट्रियभावनायाः प्रचारप्रसारे आत्मसंकल्पः हि उच्यते राष्ट्रियभावना।

**कुञ्चिकापदानि**

राष्ट्रम्, विपश्चिता, लेटिन्भाषा (Natus), प्रजातिः (Race), Nationallity, स्थालीपुलाकन्यायेन।

**प्राचीनलौकिकसंस्कृतसाहित्ये राष्ट्रियभावना**

संस्कृतसाहित्यं स्वगौरवाय न केवलं भारतवर्षे अपि तु समग्रविश्वे सुप्रसिद्धम्। संस्कृतवाङ्मये अतिप्रसिद्धाः भासः, कालिदासः, भवभूतिः, भारविः, माघः, श्रीहर्षः, भट्टिः, दण्डी, सुबन्धुः, बाणभट्टादयः स्वस्वकृतिषु राष्ट्रियभावनां प्रकटयन्ति। अस्माकं

भारतवर्षस्य राष्ट्रियगीतगाथा कविवाणिना मानवमुखे प्रतिपलं स्फुर्यते। उदाहरणस्वरूपं महाकवेः कालिदासस्य वचने[46]।

प्राचीनलौकिकसंस्कृतसाहित्यस्य अध्ययनसमये सर्वेषां विश्ववासिनाम् अन्तेवासिनाञ्च मनोमस्तिष्के प्रतीयते यत् प्राचीनलौकिकसंस्कृतकविषु अनेकेषां महाकविनां रचनासु राष्ट्रियभावना सुन्दररूपेण मूद्रिता अस्ति। तेषु महाकविषु भासः, कालिदासः विशाखदत्तः, भट्टिः, भवभूतिः, मुरारिः, अनन्तभट्टः, क्षेमेन्द्रः, श्रीहर्षादयः अतीव प्रसिद्धाः।

**भासरचनासु राष्ट्रियभावना**

भासरचनासु यथा भारतीयसंस्कृतिः, सदाचारः परिलक्ष्यते, तद्वद् रामायणमहाभारताश्रितासु कथासु प्राचीनभारतीयगरिमा, महिमा च दृश्यते। तत्र वर्णितेषु कथापात्रेषु श्रीरामः, लक्ष्मणः, हनुमान्, श्रीकृष्णः, हलायुधः बलरामः, भीष्मः, द्रोणाचार्यः, युधिष्ठिरः, भीमः, अर्जुनः, अभिमन्युः इत्यादिषु विद्यमाना राष्ट्रियभावना समग्रविश्ववासीनां

---

[46]अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनीधी वगाह्य स्थितः पृथिव्याः इव मानदण्डः।। (कु.मा.सं.1.1)

कृते राष्ट्रियभावनाप्रेरकाः। एवमेव स्त्रीपात्रेषु कौसल्या, सुमित्रा, सीता इत्यादिषु या राष्ट्रभक्तिः विद्यते सा तु समस्तविश्वनारीनां कृते अद्भुतप्रेरणा। महाकवेः भासस्य दूतवाक्ये[47]दुर्योधनः दूतं प्रति सहृदयः राजपुत्रः शत्रून् पराजित्य राज्यभोगं करोति। संसारे राज्यं याचते चेत् अपि नैव प्राप्तुं शक्यते। यदि तादृशं राज्यत्वप्राप्तये काम्यते चेत् अचिरात् साहसं प्रदर्शयतु अथवा शमाय मुनिनां सेवाश्रमे प्रविशतु इति कथयति । अत्र राष्ट्रस्य गौरवं दृश्यते।

एवमेव कर्णभाररूपके[48] प्राप्यते यत् राष्ट्रहिताय रणक्षेत्रे प्राणहानिः स्वर्गप्राप्तिः इव। एवञ्च विजयि भवति चेत् यशोलाभः। अनेन महत्त्वपूर्णवाक्येन विश्ववीराणां निर्भीकता प्रकट्यते। विश्वस्य सर्वेषु राष्ट्रेषु गोमातुः पूजाविधिः प्रचल्यमानास्ति। गोरक्षणमपि

---

[47].राज्यं नाम नृपात्मजैः सहृदयैर्जित्वा रिपून् भुज्यते।
तल्लोके चेन्नृपतित्वमाप्तुमचिरात् कुर्वन्तु ते साहसं
स्वैरं वा प्रविशन्तु शान्तमतिभिर्जुष्टं शमयाश्रमम्।। (भासनाटकचक्रम्, दूत.वा. 1.24)

[48]. हतोऽपि लभते स्वर्गं जित्वा तु लभते यश।
उभे बहुमते लोके नास्ति निष्फलता रण।। (भासनाटकचक्रम्,कर्ण. भा. 1.12)

राष्ट्रहिताय एव। सुतरां गोरक्षाहेतुः युद्धम् उचितमिति पञ्चरात्ररूपके[49] प्राप्यते।

ऊरुभङ्गरूपके[50] अपि मानः हि राज्ञां शरीरमिति उच्यते। अतः राष्ट्रभावनायाम् अस्माकं स्वाभिमानः अपेक्षितः। भासरूपकेषु प्रायः सर्वेषां रूपकानां भरतवाक्यं राष्ट्रियभावनायाः प्रतीकं वर्तते। यथा वा कर्णभाररूपके[51], अविमारके[52] च।एवं सति स्थालीपुलाकन्यायेन भासरूपकेषु राष्ट्रियभावना परिशीलिता।

**कालिदासरचनासु राष्ट्रियभावना।**

महाकविना कालिदासेन विरचितेषु ग्रन्थेषु प्रायः सर्वत्र राष्ट्रियभावनायाः सङ्केतः प्राप्यते। विशेषरूपेण स्वराष्ट्रभक्तिः परीलक्ष्यते।

---

49. धनुरुपनय शीघ्रं कल्पतां स्यन्दनो मे
मम गतिमनुयातुच्छन्दतो यस्य भक्तिः।
रणशिरसि गवार्थे नास्ति मोघः प्रयत्नो
निधनमपि यशः स्यान्मोक्षयित्वा तु धर्मः।। (भासनाटकचक्रम्, पञ्च.रा.2.5)

50. मानशरीरा राजानः। मानार्थमेव मया निग्रहो गृहीतः। ऊरु.भ. 1.63 पूर्वम्

51. सर्वत्र सम्पदः सन्तु नश्यन्तु विपदः सदा।
राजा राजगुणोपेतो भूमिमेकः प्रशास्तु नः।। (भासनाटकचक्रम्, कर्ण.भा. 1.25)

52. गोब्राह्मणनां हितमस्तु नित्यं सर्वप्रजानां सुखमस्तु लोके।
इमामुदीर्णार्णवनीलवस्त्रां नरेश्वरो नः पृथथिवीं प्रशास्तु।। (अवि.मा. 6.21)

## रघुवंशे राष्ट्रियभावना

रघुवंशमहाक्याव्यस्य रघुविजयः इत्याख्ये चतुर्थसर्गे[53] अस्माकं भारतराष्ट्रस्य आहिमालयात् कन्याकुमारीपर्यन्तं तथा कम्बोजमारभ्यः कलिङ्गपर्यन्तं इन्दुमतीस्वयम्बरनामाख्ये षष्ठसर्गे अपि भारतराष्ट्रस्य मगधः, अङ्गः, अवन्ती, माहिष्मती, मथुरा, कलिङ्गः, पाण्ड्यः, तथा कोशलनामाङ्कितानां भूमिभागानां परिचयः प्राप्यते। अनेन अखण्डभारतस्य परिकल्पना कर्तुं शक्यते।रघुवंशमहाकाव्यस्य प्रथमसर्गे अपि महाकवेः कालिदासस्य राष्ट्रियसद्भावना विद्यते। तेन च सर्वेषां विश्ववासीनां राष्ट्रियभावनाहेतुः प्रेरणा भवति।

## मेघदूते राष्ट्रियभावना

महाकविना कालिदासेन मेघदूते मेघस्य अलकापुरीगमने अस्माकं राष्ट्रस्य रामगिरिः, मालवदेशः, आम्रकूटपर्वतः, रेवानदी, निर्विन्ध्यानदी, अवन्तीदेशः एतेषां महत्त्वपूर्णनदीभूमिभागनाञ्च वर्णनं कृतवान्। अनेन महाकवेः कालिदसस्य राष्ट्रप्रेम दृश्यते। इदं हि राष्ट्रप्रेम

---

[53]. भारतमातुः मूर्त्तिरूपं परीलक्ष्यते।
काम्बोजाः समरे सोढुं तस्य वीर्यमनीश्वराः।
गजालानपरिक्लिष्टैरक्षोटैः सार्धमानता।। (कालिदासग्रन्थावली, रघु.वं.4.66)

सर्वेषां विश्ववासिनां राष्ट्रियभावनायां मूलमन्त्रः भवितुमर्हति। एतद्विहाय कालिदासप्रणीतासु अन्यकृतिषु राष्ट्रियभावनायाः सङ्केतः दृश्यते।

## भवभूतिकृतिषु राष्ट्रियभावना

महाकविना भवभूतिना विरचितेषु महावीरचरिम्, मालतीमाधवः, उत्तररामचरितम् इति ग्रन्थत्रयेषु राष्ट्रियभावना दरीदृश्यते। या तु आधुनिककाले समग्रविश्वे राष्ट्रभक्तिकृते बहूमूल्याय भवति।

## महावीरचरिते राष्ट्रियभावना

महावीरचरिते तु राष्ट्रियभावानायाः उत्तमोत्तमोदाहरणं प्राप्यते। अस्मिन् ग्रन्थे लङ्काराष्ट्रात् रावणः, ताटका, सुबाहुः, मारीचादयः लङ्कावासिनः भारतराष्ट्रे लङ्काराष्ट्रस्य अपसंस्कृतस्य प्रचारप्रसरणायः बहूप्रयत्नं कृतवन्तः। परं श्रीरामः, लक्ष्मणः, भरतः, शत्रुघ्नादयः भारतीयाः अपि स्वराष्ट्रस्य संस्कृतिरक्षणाय राष्ट्रभक्तिं प्रदर्शितवन्तः। भवभूतेः मतानुसारं रामरावणयोः युद्धन्तु संस्कृतिद्वयोः युद्धम्, तयोः युद्धं प्रजातिद्वयोः युद्धम्, तयोः युद्धं राष्ट्रद्वयस्य युद्धमिति। एवञ्च महावीरचरिते लङ्कावासिनः लङ्काराष्ट्रस्य कल्यानाय सदैव चिन्तिताः आसन्। ते सर्वदा रावणस्य हिताय तत्पराः आसन्। अत्र

राक्षसजातिनां महती राष्ट्रभक्तिः मनुष्यानां कृते प्रेरणाप्रदायिनी। लङ्काराजस्य मन्त्री माल्यवान् आर्यराष्ट्रे अनार्यसंस्कृतेः प्रचारप्रसारणाय श्रीरामस्य विपक्षे परशुराममुत्तेजयति[54]। मन्थराशरीरे शूर्पनखां प्राविश्य तस्याः सहायेन श्रीरामं वनवासाय प्रेषयति[55]। सीतापतेः विनाशाय बालीं युद्धाय प्रेरयति। परं श्रीरामः राष्ट्रकल्याणं मनसि निधाय साफल्यं प्राप्नोति। सुतरां यस्मिन् कस्मिन् विपदि राष्ट्रियभावना भवति चेत् महाशत्रुसमक्षं विजयं निश्चयेन भवत्येव।

## उत्तररामचरिते राष्ट्रियभावना

